

# त्रयः गुणशालिनः

'का कथा उक्ता चेत्, कीदृशाः प्रश्नाः पृष्टाः चेत् च त्रिविक्रमस्य मुखात् वचनानि निर्गच्छेयुः' इति चिन्तयन्तं वेतालं वशीकर्तुम् इच्छन् त्रिविक्रमः पुनरपि वृक्षस्य समीपं गतवान् । वृक्षम् आरुह्य शाखायां लम्बमानं शवं स्कन्धे आरोप्य अधः आगतवान्, यथापूर्वं मौनं श्मशानं प्रति प्रस्थितवान् च । तदा शवान्तर्गतः वेतालः अवदत् - ''राजन् ! विशालस्य देशस्य राजा सन्, अपरिमितसम्पत्तेः स्वामी अपि सन् भवान् एतादृशे भयजनके श्मशाने सञ्चारं करोति यत् तत् मयि न केवलम् आश्चर्यम्, अपि तु कांश्चन सन्देहान् अपि जनयति । यः राजा भवति सः न केवलं शत्रुभ्यः, अपि तु कपटेभ्यः मित्रेभ्यः भृत्येभ्यः च आत्मनः रक्षणार्थम् उपायान् जानीयात् । आस्थाने ये ये कार्यं कुर्वन्ति ते सर्वे स्वामिभक्ताः एव इति निर्णयम् अविचार्य न कुर्यात् अपि । राजनीतेः एतं प्रमुखम् अंशं विस्मृत्य स्वस्य

## वेतालकथा



आस्थानस्य गूढचरस्य निमित्तं प्राणान् एव समर्पयितुं प्रवृत्तस्य राज्ञः चन्द्रसेनस्य कथां श्रावयामि, येन भवतः मार्गायासः परिहृतः भवेत् । अतः एतां कथां श्रद्धया शृणोतु तावत्'' इति ।

अनन्तरं वेतालेन कथा आरब्धा -

पूर्वं शरच्चन्द्रिकाराज्यं चन्द्रसेनः नाम राजा पालयति स्म । तस्य आस्थाने शिवदत्तः नाम गूढचरः आसीत् । राज्ञः विषये विशेषश्रद्धा आसीत् तस्य । सूचितस्य कार्यस्य सिद्ध्यर्थं प्राणापायम् अपि अविगणय्य कार्यं कुर्वतः शिवदत्तस्य विषये राज्ञः चन्द्रसेनस्य अपि विशेषप्रीतिः आसीत् ।

मणिपुरं शरच्चन्द्रिकाराज्यस्य प्रतिवेशिराज्यम् । तस्य राजा प्रचण्डः । प्रचण्डः सदा चिन्तयन् भवति स्म यत् कः उपायः आश्रितः चेत् शरच्चन्द्रिकाराज्यं मदायत्तं भवेत् इति । एषः विषयः चन्द्रसेनेन अपि ज्ञातः । अतः चन्द्रसेनः निर्णीतवान् यत् शत्रोः आक्रमणात् पूर्वं मया एव शत्रुराज्यस्य उपरि आक्रमणं करणीयम् इति । एतदर्थं प्रचण्डस्य सेनाबलं, दुर्गप्रवेशार्थं मार्गः इत्यादयः ज्ञातव्याः खलु ? अतः राजा विश्वासपात्रं गूढचरं शिवदत्तम् एतस्मिन् कार्ये नियोजितवान् ।

शिवदत्तः सामान्यकृषिकस्य वेषं धृत्वा उपायेन मणिपुरराज्यं प्रविष्टवान् । महता कौशलेन तद्देशीयस्य सैन्यबलं, दुर्गस्य लोपदोषान् च ज्ञातवान् ।

'मया ये विषयाः ज्ञाताः ते अविलम्बेन चन्द्रसेनराजं प्रति निवेदनीयाः' इति निश्चित्य सः समीचीनतरम् अपि दूरमार्गं परित्यज्य कष्टकरम् अरण्यमार्गम् एव आश्रितवान् ।

अरण्यमार्गे गमनसमये कश्चन घोरः राक्षसः अकस्मात् शिवदत्तस्य पुरतः प्रत्यक्षः जातः ।

राक्षसात् आत्मनः रक्षणार्थं शिवदत्तः धावनम् आरब्धवान् । किन्तु राक्षसः विनायासं शिवदत्तस्य गमनं निवारयन् - ''अये, मत्तः कथमपि आत्मानं रक्षितुं न प्रभवति भवान् । एतम् अरण्यप्रदेशम् ऐदम्प्राथम्येन आगतेन मया प्राप्तः प्रथमः पुरुषः भवान् एव । एवं स्थिते हस्तगतं भवन्तं

कथम् अहं परित्यजेयम् ?'' इति वदन् शिवदत्तं वामहस्तेन लीलया उन्नीतवान् ।

तदा शिवदत्तः धैर्येण उक्तवान् - ''अये राक्षसोत्तम ! प्रथमं मम कथनं शृणोतु किञ्चित् । मम नाम शिवदत्तः इति । चन्द्रसेनराजस्य गुप्तचरः अस्मि अहम् । शत्रुराजसम्बन्धिनः केचन प्रमुखाः विषयाः मया सङ्गृहीताः सन्ति । तान् महाराजं निवेद्य अचिरात् एव प्रत्यागमिष्यामि । तदनन्तरं मां खादितुम् अर्हति भवान् । इदानीं कृपया मां मुञ्चतु'' इति ।

तदा राक्षसः हसन् - ''हस्तच्युतः भवान् पुनः प्राप्येत इत्यत्र कथं विश्वासः कर्तुं शक्येत ? प्रथमं तत् वदतु - भवता सङ्गृहीतः तादृशः प्रमुखः विषयः कः सः ?'' इति पृष्टवान् ।

''तत् तु रहस्यम् । तत् अहं राजानम् एव निवेदयामि, न अन्यम्'' इति उक्तवान् शिवदत्तः ।

''यदि भवता विषयः उच्येत तर्हि कदाचित् अहं भवन्तं त्यजेयम् अपि । विषयः न उक्तः चेत् खादिष्यामि भवन्तम्'' इति उक्तवान् राक्षसः ।

''एवं तर्हि मां खादतु तावत् । अहं तु विषयं न वदामि'' इति निर्विकारभावनया उक्तवान् शिवदत्तः ।

एतत् श्रुत्वा आश्चर्यं सन्तोषं च अनुभवन् राक्षसः - ''साधु मानव, साधु ! सन्तुष्टोऽस्मि भवतः धैर्येण । यत् वक्तव्यं तत् महाराजम् उक्त्वा अविलम्बेन प्रत्यागच्छतु तावत्''



इति उक्तवान् ।

शिवदत्तः राक्षसं कृतज्ञतावचनानि उक्त्वा वेगेन राजधानीं गत्वा चन्द्रसेनं मणिपुररहस्यानि सर्वाणि उक्तवान् । ततः निर्गमनत्वरां प्रदर्शयन्तं तं पृष्टवान् राजा - ''किमर्थं त्वरा ?'' इति ।

तदा शिवदत्तः राक्षसस्य मेलनं, वचनदानं च निवेद्य - ''महाराज ! अल्पा प्रार्थना मम - मम कुटुम्बस्य कोऽपि क्लेशः यथा न भवेत् तथा व्यवस्था अवश्यं भवता करणीया इति'' इति उक्त्वा अरण्यं प्रति निर्गतवान् ।

शिवदत्तस्य सत्यप्रियतां प्रभुभक्तिं च ज्ञात्वा रोमाञ्चितः चन्द्रसेनः मन्त्रिणं शासनसम्बद्धान् काश्चन मुख्यविषयान्



उक्त्वा शिवदत्तः यथा न जानीयात् तथा तम् अनुसृतवान्, अरण्यं प्राप्तवान् च।

दत्तस्य वचनस्य अनुगुणम् आगतं शिवदत्तं दृष्ट्वा राक्षसः नितराम् आश्चर्यचकितः। तावता राजा राक्षसस्य पुरतः आगत्य उक्तवान् - ''राक्षसोत्तम ! शिवदत्तस्य सत्यप्रियता दृष्टा खलु भवता ? मया सूचितस्य कार्यस्य करणकाले सः भवता दृष्टः। अतः तस्य रक्षणं मम दायित्वम्। कृपया एतं परित्यज्य मां खादतु भवान्'' इति।

तदा शिवदत्तः महाराजं पश्यन् - ''महाराज ! मम मरणात् एकस्य कुटुम्बस्य कष्टं स्यात्। किन्तु भवतः मरणात् तु समग्रं राज्यम् एव कष्टम् अनुभवेत्'' इति उक्त्वा राक्षसं पश्यन् - ''इदानीं मम खादनम् एव युक्तम्'' इति उक्तवान्।

तदा राजा - ''शिवदत्त ! राज्यविषये काऽपि चिन्ता नास्ति। यदा भवान् राजधानीं प्राप्नुयात् तदा भवतः पट्टाभिषेकार्थं व्यवस्थां कृत्वा एव आगतवान् अस्मि। भवतः शासने सर्वाः प्रजाः सुखं सन्तोषं च प्राप्नुयुः एव'' इति उक्तवान्।

तयोः एतादृशं वार्तालापं श्रुत्वा आश्चर्यम् अनुभवन् राक्षसः - ''अद्यावधि मया मद्दर्शनात् भीत्या पलायमानाः एव दृष्टाः। किन्तु भवन्तौ मरणार्थं स्पर्धां कुरुतः ! परन्तु भवतोः मनसि एषः सन्देहः न उत्पन्नः वा यत् अहम् उभौ अपि खादेयम् इति ?'' इति पृष्टवान्।

तदा राजा मन्दहासपूर्वकम् उक्तवान् - ''भवान् हस्तगतं शिवदत्तम् एव त्यक्तवान् इत्यतः ज्ञायते यत् भवतः युक्तायुक्तविवेकः अस्ति इति। अतः एव अहम् एकाकी भवत्समीपम् आगतवान्। अन्यथा ससैन्यम् अत्र आगच्छेयम्'' इति।

एतत् श्रुत्वा सन्तुष्टः अपि राक्षसः सन्तोषम् अप्रदर्शयन् उक्तवान् - ''अलं वार्तालापेन। भवतोः कतरः मया खादनीयः इति शीघ्रं निर्णयं कुरुताम्। महती बुभुक्षा मम'' इति।

''महाराज ! भवतः अपेक्षानुगुणं राज्यं पालयितुं सामर्थ्यं नास्ति मम। अतः भवान् एव राज्यं प्रतिगच्छतु'' इति राजानम् उक्तवान् शिवदत्तः।

राजा क्षणकालं विचिन्त्य राक्षसम् उद्दिश्य - ''आवयोः कतरः भवता खादनीयः इति निर्णयं कथनार्थं कश्चन कालावकाशः आवश्यकः । अतः भवता प्रतीक्षा करणीया भवेत्'' इति उक्तवान् ।

''अस्तु, सद्यःकालीनस्य आहारस्य निमित्तं कामपि अन्यां व्यवस्थां कुर्याम् । भवतः निर्णयक्रमः कः इति वदतु तावत्'' इति उक्तवान् राक्षसः ।

''शिवदत्तः राजधानीं प्रतिगत्य सैन्यस्य नायकत्वं वहन् मणिपुरराज्यस्य प्रचण्डस्य उपरि आक्रमणं करिष्यति । यदि शिवदत्तः जयं प्राप्नुयात् तर्हि मणिपुरस्य मम राज्यस्य च राजा सः एव स्यात् । अहं च भवतः आहारः भविष्यामि । यदि शिवदत्तः पराजितः भवेत् तर्हि सः भवतः आहारः भवेत् । अहं च राज्यं प्रतिगमिष्यामि'' इति उक्तवान् राजा ।

राक्षसः एतत् अङ्गीकुर्वन् - ''शिवदत्त ! विना प्रतिवचनं भवता राज्ञः एषः प्रस्तावः अङ्गीकरणीयः । भवतः प्रत्यागमनपर्यन्तं राजा मत्समीपे एव भविष्यति'' इति उक्तवान् ।

शिवदत्तः राज्ञः आदेशस्य अनुगुणं ससैन्यं गत्वा प्रचण्डस्य दुर्गस्य उपरि आक्रमणं कृतवान् । सप्ताहाभ्यन्तरे एव प्रचण्डः पराजितः अभवत् । तं कारागारे स्थापितवान् शिवदत्तः ।

ततः शिवदत्तः राक्षससमीपम् आगतवान् । तेन सह काचित् सुन्दरी अपि आसीत् ।




तां दृष्ट्वा राक्षसः आश्चर्येण पृष्टवान् - ''का एषा ?'' इति ।

तदा शिवदत्तः उक्तवान् - ''युद्धे मया पराजितस्य प्रचण्डस्य पुत्री मन्दाकिनी एषा । एषा प्रतिज्ञां कृतवती अस्ति यत् शरच्चन्द्रिकाराजम् एव परिणेष्यामि इति । अतः महाराजेन चन्द्रसेनेन एषा परिणेतव्या'' इति ।

एतत् श्रुत्वा आश्चर्यम् अनुभवन् राक्षसः पृष्टवान् - ''इदानीं किं करणीयम् ?'' इति ।

''महाराजे विशेषानुरागवत्याः एतस्याः आशायाः भङ्गः सर्वथा न शोभते । अतः महाराजं कृपया परित्यजतु भवान् । मां च आहारत्वेन स्वीकरोतु'' इति सूचितवान् शिवदत्तः ।



''राजन् ! शिवदत्तेन उक्तं श्रुतं खलु भवता अपि ? एतद्विषये किम् अभिप्रैति भवान् ?'' इति महाराजं चन्द्रसेनं पृष्टवान् राक्षसः ।

''मम दर्शनम् अङ्गीकारं वा विनैव मयि अनुरागं प्राप्तवत्याः एतस्याः अनुरागः मया पुरस्करणीयः नास्ति । अन्यत्र प्रचण्डस्य जयात् एव शरच्चन्द्रिकाराज्यस्य राजत्वं प्राप्तम् अस्ति शिवदत्तेन । एतत् तु मया पूर्वम् एव उक्तम् आसीत् । मन्दाकिनी तु शरच्चन्द्रिकाराजं परिणेष्यामि इति प्रतिज्ञां कृतवती, न तु मां परिणेष्यामि इति । अतः तया शिवदत्तः परिणीतः चेत् सर्वाः समस्याः परिहृताः भविष्यन्ति'' इति उक्तवान् राजा ।

तदा मन्दाकिनी राक्षसम् उक्तवती - ''राक्षसोत्तम ! मम दृष्ट्या शरच्चन्द्रिकाराजः नाम चन्द्रसेनमहाराजः एव । अतः तम् एव अहं परिणेतुम् इष्टवती, न तु शिवदत्तम् । पूर्वं यत् निर्णीतं तदनुगुणम् इदानीं भवता चन्द्रसेनवर्यः एव खादनीयः खलु ? एवं तर्हि तेन सह माम् अपि खादतु भवान् । तेन सह जीवितुं तु मया अवकाशः न प्राप्तः । तेनैव सह मरणं प्राप्तुं वा अवकाशं कल्पयतु कृपया'' इति ।

राजकुमार्याः मन्दाकिन्याः वचनं श्रुत्वा आश्चर्येण स्तब्धः राक्षसः क्षणकालानन्तरं मन्दाकिनीम् उद्दिश्य - ''अद्यावधि मया चिन्तितम् आसीत् यत् मानवाः न केवलं शारीरकतया, अपि तु मानसिकतया अपि दुर्बलाः एव इति । मानवाः सर्वे स्वार्थपराः, सहनारहिताः, परपीडनतत्पराः च भवन्ति इति मम चिन्तनम् आसीत् । इदानीं भवतां त्रयाणां दर्शनात् मम चिन्तनम् एव परिवृत्तम् अस्ति । राजभक्त्या, भृत्यप्रेम्णा, अनुरागातिशयेन च भवन्तः दैवत्वं प्राप्तवन्तः इव दृश्यन्ते । राजनिमित्तम् आत्मार्पणं कर्तुं सिद्धं शिवदत्तं, प्राणापायम् अपि अविगणय्य सामान्यगुप्तचरस्य प्राणानां रक्षणार्थम् उद्युक्तं महाराजं चन्द्रसेनम्, अनुरागपात्रीभूतस्य राज्ञः निमित्तं प्राणान् एव अर्पयितुं सिद्धां भवतीं वा यदि अहं मारयेयं तर्हि मया अतिनिन्द्यं कार्यं कृतं भवेत् । अतः अहं सन्तोषेण भवतः त्रीन् अपि त्यजन् अस्मि । इदानीम् एव एतत् अरण्यं परित्यज्य देशान्तरं


गमिष्यामि'' इति उक्त्वा आकाशमार्गेण निर्गत्य ततः अदृश्यः अभवत्।

वेतालः एवं कथां समाप्य अवदत् - ''राजन्! शिवदत्तस्य व्यवहारस्य विषये मम केचन सन्देहाः सन्ति। यदि सः प्रभुभक्तः एव स्यात् तर्हि प्रचण्डेन सह युद्धे पराजित्य तेन राज्ञः प्राणाः रक्षणीयाः आसन्। किन्तु तेन तथा न कृतम्। युद्धे विजयः साधितः। एतेन राज्ञः राक्षसाहारत्वं निश्चितम् अभवत्। यदि मन्दाकिनीप्रसङ्गः न स्यात् तर्हि शिवदत्तः एव राजा अभविष्यत्, चन्द्रसेनः च राक्षसस्य आहारत्वं प्राप्स्यत्। एवं ननु? किमर्थं शिवदत्तः एतादृशं व्यवहारं कृतवान्? किं तस्य अन्तरङ्गे स्वार्थबीजम् आसीत्? किं सः राक्षसस्य स्वभावं न जानाति स्म? मम एतेषां सन्देहानां समाधानं जानन् अपि यदि भवान् न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं स्यात्'' इति।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''शिवदत्तः विचिन्त्य एव सुयोग्यं व्यवहारं प्रदर्शितवान्। यदि प्रचण्डः तेन पराजितः न स्यात् तर्हि देशस्य गौरवं धूलिसात् जातं स्यात्। अतः परमशौर्येण सः शत्रुराजं जितवान्। एतस्य फलतः राज्ञा चन्द्रसेनेन राक्षसस्य आहारत्वं प्राप्तव्यं भवेत् इति सः जानाति स्म। किन्तु सः एतदपि जानाति स्म यत् राक्षसः दयामयः इति, युक्तायुक्तताम् अविचिन्त्य कमपि न खादति इति च। अतः सः शत्रुराजजयरूपं कर्तव्यं कृतं समाप्य राक्षससमीपम् आगत्य 'माम् एव खादतु' इति निवेदितवान्। तेन यत् चिन्तनं तथैव प्रवृत्तम् अपि। मन्दाकिनीप्रसङ्गः न स्यात् चेदपि सः श्रद्धापात्रस्य राज्ञः प्राणान् तु अवश्यम् अरक्षिष्यत् एव। एवं शिवदत्तस्य प्रभुभक्तिः स्फटिकवत् सर्वथा शुद्धा एव आसीत्। तेन अल्पम् अपि अनौचित्यं न आचरितम्'' इति।

एवं वदता त्रिविक्रमेण मौनभङ्गः कृतः आसीत्। अतः शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा यथापूर्वं वृक्षस्य शाखाम् अवलम्बितवान्।







# बादरायणमन्त्रः

आत्मना आरब्धं कार्यं त्यक्तुम् अनिच्छन् त्रिविक्रमः पुनरपि वृक्षस्य समीपं गतवान्, शाखायां लम्बमानं शवं स्कन्धे आरोप्य मौनं श्मशानाभिमुखं प्रस्थितवान् च। तदा शवान्तर्गतः वेतालः अवदत् - "अये राजन् ! भवान् निर्भयेन आत्मना आरब्धं कार्यं श्रद्धया निर्वहन् अस्ति इति यत् तत् प्रशंसार्हम् एव। किन्तु भवता क्रियमाणः अयं कठोरः परिश्रमः यदि कस्यचित् मन्त्रवादिनः मुनिवर्यस्य वा निमित्तं स्यात्, तर्हि भवान् अवश्यं निराशाम् अनुभविष्यति । यतः तादृशाः महापुरुषाः अमानुषीः शक्तीः साधयितुम् इच्छन्तः स्वार्थम् एव चिन्तयन्ति । एतद्विषये अत्यन्तं जागरूकता आश्रयणीया इति स्मारणार्थं मतङ्गनामकस्य मुनिवर्यस्य कथां श्रावयामि। श्रद्धया शृणोतु तावत्" इति।

अनन्तरं वेतालेन कथा आरब्धा -

पूर्वकाले राजारामनामकः कश्चित्

## वेतालकथा



गुणवान् आसीत् । वैभवजीवनं यापयतः तस्य समग्रा सम्पत्तिः नष्टा जाता ।

राजारामस्य पुत्रः सीतारामः । सीतारामः यदा विंशतिवर्षीयः जातः, तदा राजारामस्य गृहमात्रं तदधीने आसीत् । एतया चिन्तया एव शय्याम् आश्रितवान् राजारामः कदाचित् पुत्रं स्वसमीपम् आहूय उक्तवान् - ''वत्स ! मम दुराशाकारणतः एव अहम् एतां परिस्थितिं प्राप्तवान् अस्मि । किन्तु भवतः जीवने एतादृशी कष्टपरिस्थितिः न आगच्छेत् इति मम आशयः । भवतः इदानीं विंशतिवर्षाणि पूर्णानि अभवन् । अद्य रथसप्तमी अस्ति । अद्यतनदिनम् एव प्रतीक्षमाणः आसम् अहम् । इदानीं भवान् स्नात्वा शुभ्रं वस्त्रं धृत्वा अत्र आगच्छतु । सुखजीवनस्य रहस्यं भवन्तं वदिष्यामि अहम्'' इति ।

सीतारामः स्नानार्थं गन्तुम् उद्युक्तः । तावता तस्य माता लक्ष्मीदेवी पुत्रम् उक्तवती - ''वत्स ! अद्य रथसप्तमी खलु ! अतः स्नानसमये अर्कपर्णानि शिरसि संस्थाप्य स्नानं करणीयम्'' इति ।

अर्कपर्णानाम् अन्वेषणात् महान् विलम्बः जातः । तेन स्नात्वा आगमनसमये राजारामः दिवङ्गतः आसीत् । एतस्मात् नितरां दुःखितौ लक्ष्मीदेवी सीतारामः च क्रन्दनं कृतवन्तौ । तयोः क्रन्दनं श्रुत्वा प्रतिवेशिनः आगतवन्तः । प्रतिवेशिनां साहाय्येन सीतारामः पितुः शवसंस्कारं निर्वर्तितवान् ।

अनन्तरदिने प्रातःकाले एव राजारामाय दत्तस्य ऋणस्य प्रतिस्वीकरणार्थं बहवः सीतारामसमीपम् आगतवन्तः ।

रथसप्तम्याः अनन्तरदिने मम पुत्रः सर्वेषाम् ऋणदातॄणाम् ऋणं प्रत्यर्पयिष्यति इति ऋणदातॄन् सूचितवान् आसीत् राजारामः ।

आगतान् ऋणदातॄन् उद्दिश्य सीतारामः उक्तवान् - ''इदानीम् एव अहं भवताम् ऋणं प्रत्यर्पयितुं न शक्नोमि । तदर्थं कश्चन कालः आवश्यकः'' इति ।

ऋणदातारः सीतारामस्य वचनं न अङ्गीकृतवन्तः । इदानीम् एव ऋणं प्रत्यर्पयतु इति सीतारामं वदन्तः ते महान्तं कोलाहलं कृतवन्तः । एतस्मात् किंकर्तव्यतामूढः सीतारामः मौनम् आश्रितवान् । तदा

रमणनामकः ऋणदाता अन्यान् उद्दिश्य - ''भवतां सकाशात् बहु धनं न स्वीकृतवान् राजारामः। किन्तु सः मत्तः प्रभूतं धनम् ऋणरूपेण स्वीकृतवान्। अतः एतद्गृहम् अहं स्वायत्तीकरोमि। भवद्भ्यः अहं धनं दास्यामि। एषा व्यवस्था भवद्भिः अनुमता किम् ?'' इति पृष्टवान्।

सर्वे रमणस्य वचनम् अङ्गीकृतवन्तः। ''एकदिनाभ्यन्तरे भवता एतद्गृहं परित्यज्य मात्रा सह इतः निर्गन्तव्यम्। गमनसमये एकं वस्तु अपि न नेतव्यं भवता'' इति सीतारामम् आज्ञाप्य ततः निर्गतवान् रमणः।

एतत् सर्वं दृष्ट्वा दुःखिता लक्ष्मीदेवी पुत्रम् उक्तवती - ''वत्स ! कष्टकालः सन्निहितः अस्ति। गृहस्य अट्टे पुरातनी काचित् पेटिका अस्ति। तां पेटिकां स्वीकृत्य आवाम् इतः निर्गच्छाव। भवान् अट्टम् आरुह्य तां पेटिकाम् आनयतु'' इति।

मातुः वचनानुसारम् अट्टम् आरुह्य प्राचीनां पेटिकाम् उद्घाटितवान् सीतारामः। तत्र एकं लघुपुस्तकं विना अन्यत् किमपि न आसीत्। पुस्तके लिखितम् आसीत् - 'बादरायण, बादरायण, बादरायण' इति मन्त्रः यदि त्रिवारम् उच्चार्यते, तर्हि पुरतः स्थितः शत्रुः अपि स्नेहितः भविष्यति, अपेक्षानुगुणं साहाय्यं च करोति। एतत् तस्य वंशस्य वैशिष्ट्यम्' इति। तत्र अन्यः अपि कश्चन अंशः उल्लिखितः आसीत् यत् - सः विषयः स्वमरणपर्यन्तम् अपि अन्यत्र न




वक्तव्यः' इति।

एतत्सर्वं पठितवान् सीतारामः 'मरणात् पूर्वं पित्रा वक्तुम् इष्टः विषयः अयम् एव आसीत्' इति ज्ञातवान्। अनन्तरं सः अट्टात् अवतीर्य महता सन्तोषेण रमणस्य गृहं गत्वा, तेन सह सम्भाषणं कुर्वन् मनसा एव 'बादरायणं' त्रिवारं स्मृतवान्।

तदा रमणः सीतारामेण सह आत्मीयतया वार्तालापं कुर्वन् - ''भवतः पिता अत्यन्तं सज्जनः आसीत्। इदानीं भवान् कष्टकाले अस्ति इति तु मयि खेदं जनयति। तथापि भवान् दुःखं मा करोतु। भवान् यत् इच्छति, तत् वदतु। अहम् अवश्यं भवतः साहाय्यं करोमि'' इति उक्तवान्।

'मम ऋणसमस्यां निवारयतु भवान्'



इति उक्तवान् सीतारामः।

"दैवानुग्रहात् मम तु कापि न्यूनता नास्ति। अतः मह्यं भवता यत् धनं दातव्यम् आसीत् तत् मा ददातु। भवता अन्येभ्यः दातव्यम् ऋणम् अपि अहम् एव प्रत्यर्पयिष्यामि। भवान् गृहं गत्वा सुखेन जीवतु" इति उक्तवान् रमणः।

अनन्तरदिनेषु रमणः ऋणदातृभ्यः धनदानपूर्वकं सीतारामस्य साहाय्यं कृतवान्।

अकस्मात् रमणे एतादृशं परिवर्तनं कथं जातं स्यात् इति बहुधा चिन्तनेन अपि न ज्ञातवती लक्ष्मीदेवी। यतः सीतारामः बादरायणमन्त्ररहस्यं मातरं न उक्तवान् आसीत्।

इदानीं वासार्थं तु गृहम् अस्ति। ऋणव्यवहारः अपि समाप्तः। इतःपरं जीवननिर्वहणविषये चिन्तनीयम् इति चिन्तयन् एव सीतारामः आपणिकस्य मदनस्य समीपं गतवान्, बादरायणमन्त्रं त्रिवारम् उच्चारितवान् च। अनुक्षणम् आपणिकः मदनः गृहार्थम् अत्यावश्यकानि वस्तूनि सीतारामाय दत्तवान्। एवं मदनः प्रतिदिनम् अपि विना मूल्यं वस्तूनि सीतारामगृहं प्रेषयति स्म।

कानिचन दिनानि अतीतानि। कदाचित् रात्रौ कश्चित् चोरः चौर्यार्थं सीतारामस्य गृहं प्रविष्टवान्। तस्य अजागरूकतया अकस्मात् शब्दः अभवत्। एतस्मात् जागरणं प्राप्तवन्तौ लक्ष्मीदेवी-सीतारामौ भाययितुम् इच्छन् लवित्रं गृहीतवान् चोरः। अनुक्षणं सीतारामः मनसि एव त्रिवारं बादरायणमन्त्रम् उच्चारितवान्। तदा चोरः - "अहम् अनाथः अस्मि। मदीयः कोऽपि नास्ति। अद्य आरभ्य अहं चौर्यकार्यं परित्यज्य कमपि उद्योगं कुर्वन् जीवनं यापयिष्यामि" इति उक्त्वा ततः निर्गतवान् एव।

"सर्वम् अपि विचित्रम् इव भाति। सर्वे अपि किमर्थम् अस्माकं हितम् एव आचरन्ति? भवान् वशीकरणमन्त्रस्य प्रयोगं कुर्वन् अस्ति वा?" इति पुत्रं पृष्टवती लक्ष्मीदेवी।

"तथा किमपि नास्ति अम्ब! पिता दिवङ्गतः, चेदपि तदीया आत्मा एव आवयोः साहाय्यम् आचरन् अस्ति इति चिन्तयामि

अहम्'' इति उक्तवान् सीतारामः।

एवंप्रकारेण सीतारामस्य जीवननिर्वहणं विना क्लेशं प्रचलति स्म।

एवं सति कदाचित् तं ग्रामं प्रति मतङ्गनामकः मुनिवर्यः आगतवान्। मतङ्गः अपूर्वशक्तिमान्। सः ग्रामीणानां बहूनां रोगनिवारणं कृतवान्। वरप्रदानेन बहून् अनुगृहीतवान् अपि सः। तद्ग्रामीणाः सर्वे परस्परं सम्भाषणं कुर्वन्ति स्म यत् - मतङ्गः श्रेष्ठः पुरुषः इति।

सीतारामः एतं विषयं ज्ञातवान्। 'बादरायणमन्त्रसाहाय्येन यदि अहं मतङ्गं वशीकरोमि, तर्हि मया सर्वं साधितं भवति, अहम् अपूर्वशक्तिमान् भविष्यामि' इति विचिन्त्य सीतारामः मतङ्गं दृष्ट्वा बादरायणमन्त्रं मनसा उच्चारितवान्।

मतङ्गः वात्सल्यपूर्वकं सीतारामं पश्यन् पृष्टवान् - ''वत्स! भवतः मुखदर्शनेन एव ज्ञायते 'भवान् भाग्यवान्' इति। अतः मम आवश्यकता का अस्ति भवतः?'' इति।

तदा सीतारामः मतङ्गं नमस्कृत्य सविनयम् उक्तवान् - ''स्वामिन्! सामान्यजनाः अपि बहवः मम साहाय्यं कुर्वन्तः सन्ति। तस्मात् मम सामान्याः अपेक्षाः पूरिताः भवन्ति। भवादृशः महानुभावः यदि मम साहाय्यं करोति, तर्हि मम असामान्याः अपि अपेक्षाः पूरिताः भविष्यन्ति इति मम आशयः'' इति।

सीतारामस्य एतत् वचनं श्रुत्वा मतङ्गमुनिः मन्दहासपूर्वकं - ''वत्स! प्रथमं




मम कथां शृणोतु तावत्'' इत्युक्त्वा स्वकथाम् आरब्धवान् -

मम इच्छा आसीत् यत् - प्रपञ्चस्य चक्रवर्तिना भवितव्यं मया इति। तदर्थम् अहं हिमालयं गत्वा कठोरं तपः आचरितवान्। केषुचित् एव दिनेषु भगवान् प्रत्यक्षीभूय माम् उक्तवान् - ''इदानीन्तनः चक्रवर्ती सज्जनः। उत्तमरूपेण प्रजाः पालयति। चक्रवर्तिपदव्याः सः योग्यः अस्ति। अतः तस्याः पदव्याः इच्छा न उचिता भवतः'' इति।

'अहम् अपि सज्जनः, चक्रवर्तिपदव्याः अर्हः च' इति उक्तवान् अहम्।

तदा भगवान् मां हितवचनैः बोधितवान् - ''भवान् सज्जनः इत्यत्र प्रमाणं



किमपि नास्ति । चक्रवर्तिपदवीप्राप्त्यर्थं तपःकरणं न उचितम् । स्वप्रयत्नेन स्वसामर्थ्येन सा पदवी सम्पादनीया । स्वप्रयत्नेन, स्वसामर्थ्येन यः चक्रवर्तिपदवीं प्राप्तवान्, तादृशम् अपि तपसा जेतुम् इच्छता भवता अपराधः कृतः'' इति ।

''एवं तर्हि मम तपसा किं प्रयोजनम् ?'' इति पृष्टवान् अहम् ।

''तपसा भवता अपूर्वाः शक्तयः सम्पादिताः सन्ति'' इति उक्तवान् भगवान् ।

''तर्हि अहम् अपूर्वाः शक्तीः उपयुज्य एव चक्रवर्ती भविष्यामि'' इति उक्तवान् अहम् ।

मम वचनं श्रुत्वा भगवान् उक्तवान् - ''मानवः अपूर्वाणां शक्तीनाम् उपयोगम् अनिवार्यसन्दर्भे एव कुर्यात् । दुराशया प्रतिपदं सः अपूर्वशक्तेः उपयोगं करोति चेत् कालान्तरे तस्य परिणामः तेन अनुभोक्तव्यः भवति एव । यादृशं साहाय्यं सः प्राप्नोति, तादृशं साहाय्यं कर्तुं तस्य अपि सामर्थ्यं स्यात् । अन्यथा स्वीकृतस्य दशगुणितां हानिम् अनुभवेत् सः कालान्तरे । बहवः ऋषयः मत्तः वरं प्राप्य तस्य सदुपयोगेन श्रेष्ठाः जाताः सन्ति । किन्तु केचन राक्षसाः वरस्य दुरुपयोगं कुर्वन्तः दारुणं मरणं प्राप्तवन्तः । तपःकरणं सामर्थ्यसम्पादनार्थं न, अपि तु देवदर्शनार्थम्, दैवसन्निधिं प्राप्तुं च । एतं विषयं कदापि मा विस्मरतु भवान्'' इति ।

तदा मयि विवेकः उदितः । भगवति लीनः भवितुम् इच्छन् अहं मम आशयं भगवन्तं निवेदितवान् ।

''ये ये जन्म प्राप्नुवन्ति, तेषु सर्वेषु अपि किञ्चन सामर्थ्यं भवति एव । सर्वेषाम् अपि किमपि प्रयोजनम् अस्ति एव । एतावत्पर्यन्तम् अपि भवता किमपि न साधितम् । यदा भवान् स्वसौजन्यं प्रमाणीकृत्य जीवने यत्किञ्चित् साधयिष्यति, तदा एव भवान् मम सन्निधिं प्राप्तुं योग्यः भविष्यति'' इति उक्त्वा ततः अदृश्यः जातः भगवान् ।

तस्मात् दिनात् आरभ्य अहं ग्रामं ग्रामम् अटन् जनसेवां कुर्वन् अस्मि ।

मतङ्गस्य कथा श्रुत्वा सीतारामः आत्मना कृतं दोषं ज्ञातवान् ।

'अहं बादरायणमन्त्रसाहाय्येन जनानां

सकाशात् साहाय्यं प्राप्तवान् अस्मि । पिता अपि तस्य जीवितकाले बादरायण-मन्त्रोच्चारणपूर्वकम् इतरेषां साहाय्यं प्राप्तवान् आसीत् । दुराशया सः तस्य मन्त्रस्य दुरुपयोगं कृतवान् । प्रतिफलरूपेण जनानां साहाय्यं कर्तुम् अशक्तः सः क्रमशः जीवने महतीं हानिम् अनुभूतवान् । केषुचित् एव दिनेषु अहम् अपि पितुः अवस्थाम् एव प्राप्स्यामि' इति चिन्तयन्तं सीतारामं परीक्षादृष्ट्या पश्यन् मतङ्गः उक्तवान् - "वत्स ! भवति कापि वशीकरणशक्तिः अस्ति । एवं ननु ! भवतु । इदानीं भवतः अपेक्षा का ? भवतः अपेक्षां प्रपूर्य एव अहम् इतः निर्गच्छामि ।" इति ।


सीतारामः क्षणकालं विचिन्त्य - "स्वामिन् ! भवान् चक्रवर्ती भवितुम् इच्छन् तपः कृतवान् । तपसा साधितानाम् अपूर्वाणां शक्तीनां साहाय्येन भवान् जनसेवां कुर्वन् चक्रवर्तिपदव्याः प्राप्त्यर्थम् अर्हतां सम्पादितवान् अस्ति । किन्तु भवान् इदानीं चक्रवर्तिपदवीं न इच्छति । एवं खलु !" इति पृष्टवान् ।

'आम्' इति उक्तवान् मतङ्गः ।

तदा सीतारामः उक्तवान् - "स्वामिन् ! अहं चक्रवर्ती भवितुं न इच्छामि । माम् एतस्य राज्यस्य महाराजं करोतु" इति ।

"हा हन्त ! एतावता एव भवता भगवतः हितवचनं विस्मृतं किम् ?" इति पृष्टवान् मतङ्गः ।

"न विस्मृतं स्वामिन् ! अस्य देशस्य राजा



तत्स्थानात् उच्चाटनीयः इति मम आशयः सर्वथा नास्ति । एतस्य राज्यस्य राज्ञः पुत्रः नास्ति । एकमात्रपुत्री अस्ति तस्य । पुत्र्याः विवाहार्थं योग्यस्य वरस्य अन्वेषणं कुर्वन् अस्ति महाराजः । महाराजस्य जामाता भवितुं या योग्यता आवश्यकी, तां योग्यतां सम्पाद्य स्वयंवरे तां जेतुम् अहं यथा शक्नुयाम्, तादृशेन वरेण माम् अनुगृह्णातु कृपया" इति मतङ्गं प्रार्थितवान् सीतारामः ।

"भवदिष्टं सिध्यति । इदानीं भवति विवेकः उदितः अस्ति । भवतः आशयं पूरयित्वा अहं भगवतः सन्निधिं प्राप्स्यामि" इति उक्तवान् मतङ्गः ।

वेतालः एवं कथां समाप्य अवदत् -

''राजन् ! मतङ्गमुनिः आत्मना साधितानाम् अपूर्वाणां शक्तीनां साहाय्येन सीतारामम् एकस्य देशस्य महाराजपदव्या अनुगृहीतवान् इति यत्, तत् तस्य अविवेकितां द्योतयति खलु ! सीतारामः तु बादरायण-मन्त्रोच्चारणसाहाय्येन बहुजनसकाशात् आत्मना इष्टं प्राप्नुवन् आसीत् एव । तादृशः स्वार्थी देशस्य राजा भविष्यति चेत् तस्य राज्यपरिपालनं कीदृशं स्वार्थसहितं अनीतियुतं स्यात् इति ऊहितुं शक्यते । एतम् अल्पम् अपि विषयं मुनिश्रेष्ठः मतङ्गः ज्ञातुं न शक्तवान् किम् ? शीघ्रातिशीघ्रं दैवसन्निधिं प्राप्तुम् इच्छन् सः वास्तविकतां विस्मृतवान् किम् ? एतावत्पर्यन्तम् अपि सीतारामः अन्यान् अवलम्ब्य एव जीवन् आसीत् इति जानन् अपि मतङ्गः महाराजपदवीदानेन सीतारामम् अनुगृहीतवान् खलु ! एतस्य किं कारणम् ? एतेषां सन्देहानां समाधानं जानन् अपि यदि भवान् न वदेत्, तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति ।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''सीतारामः स्वयं परिश्रमेण न जीवति, अपि तु मन्त्रसाहाय्येन जनानां सकाशात् स्वस्य आवश्यकताः पूरयति इति विषयं मतङ्गः जानाति एव । सीतारामेण क्रियमाणं कार्यम् अत्यन्तं पापकरम् इति ज्ञापयितुम् इच्छन् एव मतङ्गः स्वकथां सीतारामं श्रावितवान् । आसन्नमरणेन पित्रा उक्तस्य वचनस्य श्रवणात्, मतङ्गस्य अनुभवश्रवणात् च सीतारामस्य मनसि महत् परिवर्तनं जातम् अस्ति । यस्मात् साहाय्यं स्वीकृतं तेषां सर्वेषां साहाय्यं करणीयं चेत् प्रभूतं धनम् आवश्यकम् । तदर्थं राजपदवीप्राप्तिमार्गं विना अन्यः उपायः नास्ति । एतत् सर्वं विचिन्त्य एव सीतारामः राजा भवितुम् इष्टवान् । मतङ्गः अपि सीतारामस्य मनोभावम् अवगत्य तम् अनुगृहीतवान् । तेन किञ्चिदपि अविवेकिता न आचरिता इति तु स्पष्टम्'' इति ।

एवं राज्ञः यदा मौनभङ्गः जातः, तदा शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा यथापूर्वं वृक्षस्य शाखाम् अवलम्बितवान् ।






# चन्द्रशेखरस्य कथा

जीवने कर्तव्यम् एव प्रधानं चिन्तयन् त्रिविक्रमः पुनरपि वृक्षसमीपं गतवान् । वृक्षम् आरुह्य शाखायां लम्बमानं शवं स्कन्धे आरोप्य अधः आगतवान् । मौनं श्मशानाभिमुखं प्रस्थितवान् च । तदा शवान्तर्गतः वेतालः अवदत् - "अये राजन् ! भीकरे अस्मिन् श्मशाने मध्यरात्रसमये उलूकशृगालादयः केवलम् अटन्ति, न तु मानवाः । किन्तु राजा भवान् उद्दिष्टं किमपि कार्यं मनसि निधाय, स्वसुखम् अपि परित्यज्य एतस्मिन् कार्ये प्रवृत्तः अस्ति । वस्तुतः राज्ञा सता भवता अस्मिन् समये अन्तःपुरे तल्पे सुखेन शयनं करणीयम् आसीत् । किन्तु तत् परित्यज्य भवान् अत्र श्मशाने महान्तं परिश्रमं वहन् अस्ति । अतः मयि सन्देहः उदेति यत् भवतः अहम्भावः अविवेकिता च अस्ति इति । सामान्यजनानां दृष्ट्या भवान् महापुरुषः स्यात् नाम कदाचित् । तादृशाः महापुरुषाः

वेतालकथा



अपि कदाचित् अविवेकेन व्यवहरन्ति । एतस्य निदर्शनार्थं कस्यचित् कविराजस्य कथां श्रावयामि । श्रद्धया शृणोतु तावत् । कथाश्रवणेन भवतः मार्गायासः परिहृतः भविष्यति'' इति ।

अनन्तरं वेतालेन कथा आरब्धा -

पूर्वं कौशाम्बिदेशस्य कस्मिंश्चित् कुग्रामे चन्द्रशेखरनामकः युवकः आसीत् । सकलशास्त्रपारङ्गतः सः आशुकवितारचने अत्यन्तं प्रतिभावान् आसीत् ।

चन्द्रशेखरः कस्यचित् दरिद्रस्य पुत्रः आसीत् । तस्य कवितासामर्थ्यं ज्ञात्वा बहवः तम् उक्तवन्तः - ''भवान् कौशाम्बिराजस्य विजयभूपतेः समीपं गच्छतु, येन भवान् राजाश्रयं प्राप्तुं शक्नोति । तस्मात् भवतः अग्रिमजीवनम् अपि सुखमयं भविष्यति'' इति ।

कौशाम्बिदेशस्य कश्चन सम्प्रदायः अस्ति । तस्य देशस्य यः कोऽपि कविः भवतु, तेन सर्वप्रथमं समीपस्थः भूस्वामी आश्रयणीयः । भूस्वामिना सह कानिचन दिनानि वसेत् सः । अनन्तरं भूस्वामी एव तं कविं महाराजसमीपं नयेत् ।

परम्परागतम् एतं सम्प्रदायम् उल्लङ्घ्य राज्ञः समीपं गन्तुं न इच्छति चन्द्रशेखरः । अतः 'गृहात् अनतिदूरे स्थितस्य चक्रपुरस्य भूस्वामी वीरवर्धनः आश्रयणीयः' इति निश्चित्य सः शुभे मुहूर्ते चक्रपुरं प्रति प्रस्थितः ।

चन्द्रशेखरः यावत् वीरवर्धनस्य गृहं प्राप्तवान्, तावता तत्रत्या परिस्थितिः उत्तमा न आसीत् । तद्गृहसदस्याः सर्वे अपि अतीव दुःखिताः आसन् । एतत् दृष्ट्वा दिग्भ्रान्तः चन्द्रशेखरः 'किं प्रवृत्तम् ?' इति तत्रत्यान् पृष्टवान् ।

वस्तुस्थितिः एषा आसीत् - वीरवर्धनस्य एकमात्रपुत्र्याः शीलवत्याः विवाहः मासात् पूर्वं सम्पन्नः आसीत् । इतोऽपि पत्न्या सह श्वशुरगृहे एव आसीत् शीलवत्याः पतिः । तस्मिन् दिने उद्याने विहारसमये सर्पेण दष्टः सः मृतः आसीत् । एतस्मात् सर्वे दुःखिताः आसन् ।

एतस्मात् चन्द्रशेखरः चिन्तितवान् यत् - गृहतः प्रस्थिते मुहूर्ते एव शीलवत्याः पतिः मृतवान् इति । एतत् अशुभम् इति विचिन्त्य


क्षणम् अपि तत्र स्थातुम् अनिच्छन् सः ततः स्वग्रामं प्रति गतवान्।

चन्द्रशेखरस्य प्रत्यागमनात् खिन्नः तस्य पिता सप्ताहानन्तरं समीरपुरस्य भूस्वामिनः वल्लभरायसमीपं गमनार्थं स्नेहितद्वारा मुहूर्तनिश्चयं कृतवान्।

शुभे मुहूर्ते प्रस्थितः चन्द्रशेखरः समीरपुरं प्राप्य वल्लभरायस्य गृहं गतवान्। तत् गृहं प्राप्तवता चन्द्रशेखरेण ज्ञातं यत् - पूर्वस्मिन् दिने एव भूस्वामी वल्लभरायः तीव्रज्वरेण पीडितः अस्ति इति, वैद्याः अपि ज्वरस्य कारणं न ज्ञातवन्तः इति। तस्मात् सर्वेऽपि चिन्तामग्नाः सन्ति इति च।

द्वितीयवारम् अपि प्रयत्नः विफलः जातः इत्यतः चन्द्रशेखरः निराशया खिन्नः जातः। ततः सः स्वगृहं प्रति प्रस्थितः। मध्येमार्गं पिपासितः सः समीपस्थे तटाके जलं पीत्वा तटाकपार्श्वस्थस्य वटवृक्षस्य अधः शयनं कृतवान्। तेन एव मार्गेण गच्छन् अन्यः कश्चित् प्रयाणिकः जलं पातुम् इच्छन् तटाकं गतवान्, जलं पीतवान् च। चन्द्रशेखरः प्रयाणिकस्य आगमनं न लक्षितवान्। प्रयाणिकः जलं पीत्वा प्रतिगमनसमये चन्द्रशेखरं दृष्ट्वा तस्य मुखभावेन तस्य समस्यां च अवगत्य चन्द्रशेखरम् उद्दिश्य पृष्टवान् - ''स्वामिन्! 'भवान् कः' इति किम् अहं ज्ञातुं शक्नोमि ?'' इति।

ध्वनिश्रवणात् जागरितः चन्द्रशेखरः उत्थाय निर्विकारभावेन उक्तवान् - ''न तादृशः महापुरुषः अहम्। कश्चित् निर्भाग्यः



अहम्'' इति।

एतत् श्रुत्वा आश्चर्यचकितः प्रयाणिकः सूक्ष्मदृष्ट्या शेखरम् अवलोकयन् - ''भवान् देव्याः सरस्वत्याः मानसपुत्रः अस्ति। भवान् कदापि निर्भाग्यः न भविष्यति। यतः भवतः कान्तियुते नेत्रे एव सूचयतः यत् - भवति ब्रह्मतेजः अस्ति इति। अपि च विशालः भवतः ललाटः भवतः सौभाग्यं सूचयति। दीर्घौ बाहू इन्द्रधनुसदृशं भ्रूद्वयं च सूचयन्ति यत् - भवान् प्रकृतिपुरुषः इति। भवतः दक्षिणहस्तं दर्शयतु'' इति वदन् चन्द्रशेखरस्य पार्श्वे एव उपविष्टवान्।

चन्द्रशेखरः स्वदक्षिणहस्तं दर्शितवान्। तस्य हस्ते विद्यमानाः रेखाः सूक्ष्मं परिशीलयन् प्रयाणिकः - ''मासत्रयं यावत्



भवान् प्रयाणं मा करोतु । कुत्रापि मा गच्छतु । आगामिमाघशुद्धपञ्चम्यां भवतः ग्रामस्य उत्तरदिशि प्रयाणं करोतु । प्रथमं यस्य भूस्वामिनः गृहं लभ्यते, तम् आश्रित्य तिष्ठतु भवान् । सर्वं शुभकरं भविष्यति'' इति उक्त्वा ततः निर्गतवान् ।

एतस्याः घटनातः अतीव आश्चर्यचकितः चन्द्रशेखरः प्रयाणिकेन उक्तं भविष्यम् एव चिन्तयन् गृहं प्रति प्रस्थितः ।

चन्द्रशेखरस्य ग्रामस्य उत्तरदिशि अनतिदूरे भूस्वामी नरसिंहवर्मा निवसति । नरसिंहवर्मा वयसा ज्येष्ठः । बहुभ्यः वर्षेभ्यः पूर्वं कदाचित् तस्य प्रदेशः यदा क्षामपीडितः अभवत्, तदा स्वकीयां समग्रां सम्पत्तिं विक्रीय तत्प्रदेशस्य सर्वेषां जनानां प्राणान् रक्षितवान् आसीत् विनयशीलः भूस्वामी नरसिंहवर्मा । तस्य पञ्च पत्न्यः आसन् । तस्य अविवेकिताः सुप्रसिद्धाः आसन् । सः कवीनां कृतिः शृणोति इत्येतत् सत्यम् एव चेदपि सर्वेषु आदरं प्रकटयति इति न । प्रतिभायाः अवगमने रसग्रहणे च तस्य सामर्थ्यं न आसीत् । अतः उत्तमाः अपि बहवः कवयः ततः ताम्बूलमात्रं प्राप्य धनं किञ्चिदपि अप्राप्य निराशया प्रत्यागताः आसन् । एतदतिरिच्य नरसिंहवर्मा नीरसाः कविताः रचयित्वा श्रावयति स्म । ताः नीरसाः अपि कविताः सहनया श्रुत्वा आश्रितकविना सन्तोषः प्रकटनीयः भवति स्म । एतत्सर्वं जानाति स्म चन्द्रशेखरः ।

गृहं प्रति गमनानन्तरं चन्द्रशेखरः प्रयाणिकेन उक्तं भविष्यं पितरं निवेदितवान् । मासत्रयानन्तरं चन्द्रशेखरः प्रयाणिकेन सूचिते मुहूर्ते नरसिंहवर्मणः गृहं प्रति प्रस्थितः ।

चन्द्रशेखरस्य आगमनोद्देशं ज्ञात्वा नरसिंहवर्मणः सेवकः उक्तवान् - '' अद्य भूस्वामिनः पितुः पुण्यतिथिः अस्ति । अतः सः अन्तः कार्येषु मग्नः अस्ति । अद्य सायङ्कालपर्यन्तम् अपि सः वार्तालापार्थं न मिलति'' इति ।

सेवकस्य एतत् वचनं श्रुत्वा चन्द्रशेखरः यद्यपि खिन्नः, तथापि कथञ्चित् दर्शनं प्राप्य एव गन्तव्यम् इति निश्चित्य सः सेवकम् - ''भवतु । अहं सायङ्कालपर्यन्तम् अपि अत्रैव उपविश्य प्रतीक्षां करोमि । किन्तु सायङ्काले

कृपया तस्य दर्शनम् अवश्यं कारयतु'' इति सविनयं प्रार्थितवान्।

चन्द्रशेखरस्य दीनस्थितिं, तदीयं मुखतेजः च दृष्ट्वा 'एषः कश्चित् पण्डितः स्यात् एव' इति विचिन्त्य तम् उक्तवान् - 'सायङ्काले अवश्यं भूस्वामिनः दर्शनं कारयिष्यामि' इति। अनन्तरं सः सेवकः अतिथिगृहे चन्द्रशेखरस्य भोजनव्यवस्थां कृतवान्।

सायङ्कालः जातः। किन्तु भूस्वामिनः दर्शनं तु न जातम् एव। सर्वत्र अन्धकारः प्रसरन् आसीत्। तदा सेवकः चन्द्रशेखरसमीपम् आगत्य - "स्वामिन्! भवतः आगमनविषयम् अहं भूस्वामिनं निवेदितवान् अस्मि। अद्य भूस्वामिनः पितुः श्राद्धं खलु! 'मम पिता कविताप्रियः आसीत्। पितुः पुण्यतिथिदिने यः कविः आश्रयम् इच्छन् आगतवान्, सः पण्डितः न चेदपि अस्माभिः पूजनीयः एव। अद्य आरभ्य सः अस्माकम् आस्थानकविषु अन्यतमत्वेन तिष्ठतु। तस्मै षोडशशतं कौशेयवेष्टीः उपायनरूपेण दत्त्वा अश्वं च दत्त्वा गौरवपूर्वकं तस्य प्रतिप्रयाणव्यवस्थां करोतु' इति माम् आज्ञापितवान् अस्ति भूस्वामी। श्वः आरभ्य भवता प्रतिदिनम् अत्र आगत्य भवतः कवितामाधुर्येण सभ्याः तोषणीयाः। एषा भूस्वामिनः आज्ञा। सर्वविधव्यवस्था करणीया आसीत् इत्यतः किञ्चित् विलम्बः जातः। स्वीकरोतु कृपया एताः वेष्टीः। भवतः प्रतिप्रयाणार्थं बहिः अश्वः सिद्धः




अस्ति'' इति उक्तवान्।

एतत् श्रुत्वा चन्द्रशेखरः दिग्भ्रान्तः। यतः एतत् सर्वं तेन न ऊहितम् आसीत्। पुनः किमपि प्रतिवक्तुम् अशक्तः सः भूस्वामिने कोटिप्रणामान् उक्त्वा निराशया एव अश्वम् आरुह्य प्रतिप्रस्थितः।

चन्द्रशेखरः एकं वर्षं यावत् नरसिंहवर्मणः आस्थानकवित्वेन स्थितवान्। वृद्धस्य नरसिंहवर्मणः आस्थाने अल्पज्ञानिनः कवयः केवलं धनार्थं तम् आश्रित्य जीवन्ति स्म। तत्र चन्द्रशेखरस्य किञ्चिदपि मनश्शान्तिः न आसीत्। एतस्मात् कारणात् दिनेषु अतीतेषु चन्द्रशेखरस्य निरुत्साहः वर्धमानः एव आसीत्।

एवं स्थिते कदाचित् शकटचालकः न



आगतः इत्यतः चन्द्रशेखरः पादाभ्याम् एव पद्मनाभपुरं प्रति प्रस्थितः । ग्रीष्मकाल-कारणतः पिपासितः सः जलपानार्थं समीपस्थस्य तटाकस्य समीपं गतवान् । तटाकतीरस्थस्य वृक्षस्य अधोभागे उष्णीषधारी कश्चित् प्रयाणिकः विश्रान्त्यर्थम् उपविष्टवान् आसीत् । अनतिदूरे एव कश्चित् उत्तमजातीयः अश्वः चरन् आसीत् ।

जलं पीत्वा प्रत्यागच्छन्तं चन्द्रशेखरं दृष्ट्वा सः प्रयाणिकः मन्दहासं प्रकटितवान् । चन्द्रशेखरः अपि प्रत्युत्तररूपेण मन्दहासं प्रकट्य तस्य समीपे एव उपविष्टवान् ।

''स्वामिन् ! भवान् कः इति किम् अहं ज्ञातुं शक्नोमि ?'' इति मन्दहासपूर्वकं पृष्टवान् प्रयाणिकः ।

एतत् श्रुत्वा चन्द्रशेखरः - 'पूर्वं कदाचित् केनचित् प्रयाणिकेन एवमेव प्रश्नः कृतः आसीत् । तदा मया उत्तरितम् आसीत् - 'अहं कश्चित् निर्भाग्यः' इति । अनन्तरं तेन प्रयाणिकेन भविष्यम् उक्तम् आसीत्' इति पूर्वं प्रवृत्तं स्मरन् सः उक्तवान् - ''अहं कश्चित् मनुष्यः । अदृष्टदेवता मम माता । दुरदृष्टदेवः मम पिता'' इति ।

तदा प्रयाणिकः आश्चर्येण - ''कः अर्थः भवतः कथनस्य ?'' इति पृष्टवान् ।

''मां कृपया क्षाम्यतु । किमपि चिन्तयता मया असम्बद्धं प्रलपितम् । इदानीं भवतः प्रश्नस्य उत्तररूपेण एकां कवितां श्रावयामि । शृणोतु तावत्'' इति उक्त्वा चन्द्रशेखरः भावपूर्णां कविताम् एकां श्रावितवान् ।

तस्याः कवितायाः भावार्थः एषः - ''पूर्णिमादिने उद्यानस्थानि पुष्पाणि सौगन्ध्यं प्रसारयन्ति । तस्मात् सौगन्ध्यात् आकृष्टाः भ्रमराः पुष्पस्थं मकरन्दं सन्तोषेण पिबन्ति । तस्मिन् समये त्रिलोकसुन्दरी काचित् तरुणी म्लानवदना सती उपविष्टवती अस्ति । तरुण्याः दुःखं ज्ञात्वा पुष्पाणि तां पृच्छन्ति - ''वयं तु एकदिनाभ्यन्तरे एव म्लानतां प्राप्नुमः । तथापि वयम् अस्मिन् आह्लादजनके वातावरणे सन्तोषेण भवामः । भवती तु बहूनि वर्षाणि जीवति । तादृश्याः अपि भवत्याः मुखं म्लानम् अस्ति खलु ! किं कारणम् ?'' इति । तदा सा तरुणी वदति - ''आम् ! भवतां वचनं युक्तम् एव । किन्तु मां

परितः ये भ्रमराः सन्ति, ते मां न तोषयन्ति, अपि तु कण्टकसदृशाः ते मां सदा पीडयन्ति'' इति।

कवितां श्रावयित्वा चन्द्रशेखरः प्रयाणिकम् उद्दिश्य - ''कवितायां या तरुणी अस्ति, सा मम अन्तरात्मनः कविता। तस्याः कवितायाः आराधकः निर्भाग्यः अहम्। किन्तु मम कुटुम्बं पोषयन् अहं भाग्यवान्। एतद्विषये कृपया अन्यत् किमपि मा पृच्छतु कृपया। इदानीम् एव अतीव श्रान्तः अस्मि अहम्'' इति उक्त्वा तं प्रयाणिकं नमस्कृत्य ततः निर्गतवान्।

सप्ताहः अतीतः। कदाचित् प्रातःकालसमये चन्द्रशेखरस्य गृहस्य पुरतः राजमुद्रायुक्तः अश्वशकटः कश्चित् आगतः। तेन शकटेन आगतौ द्वौ भटौ चन्द्रशेखरेण मिलित्वा 'सत्कारपूर्वकं भवान् आनेतव्यः इति महाराजः विजयभूपतिः उक्तवान् अस्ति' इति उक्त्वा आज्ञापत्रं प्रदर्शितवन्तौ।

एतस्मात् चन्द्रशेखरः ऊहितवान् यत् - सप्ताहात् पूर्वं तटाकतीरे मिलितवान् प्रयाणिकः महाराजः एव इति।

चन्द्रशेखरः भटाभ्यां सह राजभवनं गतवान्। महाराजः स्नेहभावेन चन्द्रशेखरम् आलिङ्ग्य उक्तवान् - ''कविवर्य! अद्य आरभ्य प्रतिदिनम् अपि भवान् स्वकवितामाधुर्येण अस्मान् सन्तोषयतु'' इति।

एतत् श्रुत्वा चन्द्रशेखरः सविनयम् उक्तवान् - ''भवतः आस्थाने स्थितिः इति



यत् तत् महतः सन्तोषस्य विषयः। अहं भाग्यवान्। किन्तु मम किञ्चित् निवेदनम् अस्ति - 'अहं नरसिंहवर्मणः आस्थानकविः अस्मि। अतः तस्य अनुमतिं प्राप्य एव मया अत्र आगन्तव्यम् इति'' इति।

महाराजस्य वैभवपूर्णेन सत्कारेण अतीव सन्तुष्टस्य चन्द्रशेखरस्य नेत्रे अश्रुपूर्णे जाते।

अनन्तरं महाराजः विजयभूपतिः उक्तवान् - ''कविताचातुर्येण सह भवतः संस्कारः विनयशीलता च तस्मिन् दिने एव मया अवलोकिते। भवतः इच्छानुसारं नरसिंहवर्मणः अनुमतिं प्राप्य एव आगच्छतु'' इति।

वेतालः एवं कथां समाप्य अवदत् - ''राजन्! उत्तमस्य प्रतिभावतः च कवेः

चन्द्रशेखरस्य उत्तमं जीवनं कल्पयितुम् इष्टवान् महाराजः विजयभूपतिः । नरसिंहवर्मणः समीपे तु चन्द्रशेखरस्य जीवनं कण्टकावृतं पाटलपुष्पम् इव आसीत् । अतः उत्तमजीवनदात्रे महाराजाय विजयभूपतये चन्द्रशेखरेण कृतज्ञताः समर्पणीयाः आसन् । किन्तु चन्द्रशेखरस्य व्यवहारः तद्विरुद्धः आसीत् । एषः व्यवहारः चन्द्रशेखरस्य अविवेकितां मूर्खतां च द्योतयति खलु ! अपि च एतादृशम् अविवेकिनं मूर्खं च चन्द्रशेखरं विजयभूपतिः विनयशीलः संस्कारवान् इति च प्रशंसितवान् इति यत् तदपि न्याययुतम् इति न भाति खलु ! एतेषां सन्देहानां समाधानं जानन् अपि यदि भवान् न वदेत्, तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''मनुष्यस्य कलायाः अपेक्षया अपि प्रधानम् आहारः । नरसिंहवर्मा चन्द्रशेखरकुटुम्बस्य अन्नदाता । अन्नदाता नाम प्राणदाता एव । अरसिककविताकथनं नरसिंहवर्मणः स्वभावः । यदि तद्विषये प्रस्तावः क्रियते, तर्हि दोषदर्शनं कृतं भवति । तादृशः दोषदर्शनयुतः नीचसंस्कारः चन्द्रशेखरस्य नास्ति । अतः एव सः स्वमानसिकवेदनां कविताद्वारा प्रकटीकृतवान् । किन्तु नरसिंहवर्मणः गौरवं सदा रक्षितवान् चन्द्रशेखरः । एतत् सर्वं ज्ञात्वा एव विजयभूपतिः 'विनयशीलस्य भवतः उत्तमसंस्कारः अस्ति' इति तस्य प्रशंसां कृतवान् । एषा प्रशंसा महाराजस्य सौजन्यं द्योतयति । महाराजस्य विजयभूपतेः स्नेहपूर्णेन सत्कारेण चन्द्रशेखरः यान् अश्रुबिन्दून् स्रावितवान्, ते एव चन्द्रशेखरेण अर्पिताः कृतज्ञताः । तानि एव प्रशंसावचनानि । अतः चन्द्रशेखरः विजयभूपतिः च उभौ अपि विवेकिनौ बुद्धिमन्तौ च, न तु मूर्खौ अविवेकिनौ वा'' इति।

एवं राज्ञः यदा मौनभङ्गः जातः तदा शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा यथापूर्वं वृक्षस्य शाखाम् अवलम्बितवान् ।





# वचनभङ्गः

आरब्धं कार्यं परित्यक्तुम् अनिच्छन् त्रिविक्रमः पुनरपि वृक्षस्य समीपं गतवान्, शाखायां लम्बमानं शवं स्कन्धे आरोप्य मौनं श्मशानाभिमुखं प्रस्थितवान् च। तदा शवान्तर्गतः वेतालः अवदत् – "हे राजन्! कोऽपि स्वसमस्यापरिहारार्थं भवन्तं दैन्येन प्रार्थितवान् स्यात्। तस्मात् भवान् तस्य साहाय्यं कर्तुम् इच्छन् एतावन्तं परिश्रमं वहन् अस्ति इति मम सन्देहः। किन्तु मानवेषु बहवः स्वार्थिनः भवन्ति। ते स्वकार्यस्य सिद्धेः अनन्तरम् आत्मना दत्तं वचनं विस्मरन्ति। एतस्य निदर्शनार्थम् इन्द्रपुरस्य महाराज्ञ्याः इन्दुमत्याः कथां श्रावयामि। श्रद्धया शृणोतु तावत्" इति।

अनन्तरं वेतालेन कथा आरब्धा –

इन्दुमती इन्द्रपुरस्य महाराजस्य जयसिंहस्य पट्टमहिषी। विवाहितायाः तस्याः द्वादश वर्षाणि अतीतानि चेदपि अपत्यानि न अभवन्। अपत्यप्राप्त्यर्थम्

## वेतालकथा



इन्दुमती सदा श्रद्धया देवपूजां करोति स्म। पुण्यक्षेत्राणां दर्शनं करोति स्म । सा प्रतिशनिवासरं निराहारा सती पर्वतस्थं कार्तिकेयस्य आलयं गत्वा अपत्यप्राप्त्यर्थं देवं प्रार्थयति स्म। अनन्तरं देवालयस्य पृष्ठतः स्थितस्य वटवृक्षस्य अधः विद्यमानं वल्मीकं पूजयति स्म।

इन्दुमती कदाचित् शनिवासरे देवं सम्प्रार्थ्य दुःखमिश्रितेन स्वरेण अर्चकम् उक्तवती - "श्रद्धया भक्त्या च एतस्य देवस्य प्रार्थना क्रियते चेत् अपत्यप्राप्तिः भविष्यति इति जनाः वदन्ति। अहं त्रिंशतं शनिवासरान् यावत् विना लोपं एतस्य कार्तिकेयस्य पूजां कृतवती अस्मि। तथापि किमपि प्रयोजनं न जातम्" इति।

तदा अर्चकः - "महाराज्ञि ! भवती निराशा मा भवतु। देवः अवश्यं भवतीं पुत्रेण अनुग्रहीष्यति एव" इति तां धैर्यवचनानि उक्तवान्।

एतत् श्रुत्वा इन्दुमती दीर्घं निश्वस्य, ततः देवालयस्य पृष्ठभागं गत्वा वल्मीकं क्षीरेण अभिषिच्य, हरिद्रा-कुङ्कुमाभ्यां पूजयित्वा ततः गन्तुम् उद्युक्ता । तदा - 'इन्दुमति ! अत्र आगच्छतु' इति ध्वनिः श्रुतः। एतस्मात् आश्चर्यचकिता इन्दुमती परितः अवलोकितवती । वटवृक्षात् अनतिदूरे शिलायां कश्चित् उपविष्टवान् आसीत्। दर्शनेन सः संन्यासी इव आसीत्।

अनामिकः कश्चित् आत्मानं नाम्ना आहूतवान् इत्यतः इन्दुमती क्षणकालं कुपिता । तावता सः मन्दहासपूर्वकम् उक्तवान् - "इन्दुमति ! कुपिता मा भवतु भवती । अपत्यप्राप्त्यर्थं भवती व्रतादिकं कुर्वती अस्ति इति ज्ञात्वा भवतीम् अनुग्रहीतुम् आगतवान् अहम्" इति।

स्वदुःखं ज्ञातवान् सः महानुभावः न सामान्यः इति ज्ञात्वा इन्दुमती तस्य समीपं गत्वा तं नमस्कृत्य उक्तवती - "स्वामिन् ! कृपया माम् अनुगृह्णातु" इति।

संन्यासी स्वपार्श्वे एव स्थितं स्यूतम् इन्दुमत्यै दर्शयन् उक्तवान् - "एतस्मिन् स्यूते कदलीफलानि सन्ति । ततः एकमात्रं कदलीफलं स्वीकृत्य भवत्या खादनीयम् । तस्मात् भवत्याः इच्छा पूरिता भविष्यति" इति।



इन्दुमती स्यूतसमीपं गत्वा दृष्टवती। स्यूते बहूनि कदलीफलानि आसन्। 'आरोग्यवान् पुत्रः आवश्यकः' इति चिन्तयन्ती इन्दुमती स्यूतात् स्थूलं किञ्चन फलं स्वीकृतवती। तत् फलं प्रसादं मत्वा नेत्रयोः स्पर्शं कृत्वा त्वक् निष्कास्य खादितवती। तदा ज्ञातं यत् - तत् फलं यमलम् आसीत् इति।

इन्दुमत्याः फलखादनसमये संन्यासी मौनम् उत्थाय स्यूतं गृहीत्वा ततः निर्गतवान् आसीत्।

ततः त्रयः मासाः अतीताः। राज्ञी इन्दुमती गर्भवती जाता। एतस्मात् इन्दुमती जयसिंहः च अतीव सन्तुष्टौ। नवानां मासानाम् अनन्तरम् इन्दुमती प्रसूतवती। किन्तु पूर्वं तया खादितस्य कदलीफलस्य इव शिशुद्वयस्य अपि शरीरं परस्परं युक्तम् आसीत्।

दश दिनानि अतीतानि। तदा राजवैद्याः परीक्ष्य उक्तवन्तः - "षट्सप्ताहाभ्यन्तरे शस्त्रचिकित्सया शिशुद्वयस्य शरीरं पृथक्करणीयम्। नो चेत् प्राणापायः भविष्यति" इति।

तदा जयसिंहः उक्तवान् - "अविलम्बेन शस्त्रचिकित्साकार्यं भवतु" इति।

एतत् श्रुत्वा चिन्तामग्नाः राजवैद्याः उक्तवन्तः - "महाराज! अनुभविभिः वैद्यैः एव एषा शस्त्रचिकित्सा करणीया। तादृशः समर्थः शस्त्रचिकित्सकः कोऽपि अस्माकं राज्ये नास्ति" इति।

"तर्हि अन्यत्र कुत्र अस्ति तादृशः समर्थः शस्त्रचिकित्सकः?" इति पृष्टवान् महाराजः।

तदा इन्दुमती उक्तवती - "एतां शस्त्रचिकित्सां यः करोति, तस्मै पारितोषिकं दीयते इति प्रकटनं कुर्वन्तु" इति। राजवैद्याः क्षणं विचिन्त्य उक्तवन्तः - "महाराज्ञि! अस्माकं ज्ञानानुसारम् अश्विनीदत्तनामकः वैद्यः एतां शस्त्रचिकित्सां कर्तुं समर्थः" इति।

अश्विनीदत्तस्य नामश्रवणमात्रेण कुपितः राजा जयसिंहः उक्तवान् - "अश्विनीदत्तः नाम चन्द्रगिरिराज्यस्य आस्थानवैद्यः खलु! चन्द्रगिरेः राजा रुद्रसेनः मम शत्रुः। अतः मम अपत्यं मृतं भवति चेदपि चिन्ता नास्ति। किन्तु मम शत्रोः साहाय्यं न प्रार्थयामि

अहम्'' इति।

जयसिंहस्य पुत्रप्राप्तिः जाता इति वार्तां श्रुत्वा प्रतिवेशिराज्यानां राजानः अभिनन्दनसन्देशान् प्रेषितवन्तः। किन्तु चन्द्रगिरेः राजा रुद्रसेनः - 'यद्यपि पुमपत्यं जातम्, तथापि शरीरं परस्परं युक्तम् अस्ति खलु। दुःखस्य विषयः एषः' इति सन्तापसूचकसन्देशं प्रेषितवान्।

एतं सन्देशं दृष्टवतः जयसिंहस्य कोपः प्रवृद्धः।

इन्दुमती हितवचनेन पतिं बोधितवती यत् - पुत्रयोः हितरक्षणार्थं रुद्रसेनस्य साहाय्यम् अनिवार्यम् इति।

एतत् श्रुत्वा जयसिंहः कोपेन उक्तवान् - ''अस्मिन् विषये अधिकम् अनुरोधं मा करोतु भवती। अहं सर्वथा रुद्रसेनस्य साहाय्यं न इच्छामि'' इति।

'पत्युः सकाशात् एतत् कार्यं साधयितुं न शक्यम्' इति विचिन्त्य इन्दुमती चिन्तितवती यत् मया एव अश्विनीदत्तस्य समीपं गत्वा विषयः निवेदनीयः इति।

अनन्तरदिने सा यमलौ पुत्रौ वैद्यानां रक्षणे स्थापितवती। 'मातृगृहम् गत्वा आगमिष्यामि' इति पतिं जयसिंहम् उक्त्वा महाराज्ञीवेषं परिवृत्य कयाचित् दास्या सह प्रस्थितवती च। महता परिश्रमेण दिनद्वयं यावत् अरण्यमार्गेण प्रयाणं कृत्वा इन्दुमती चन्द्रगिरिं प्राप्तवती।

चन्द्रगिरौ राजवैद्यस्य अश्विनीदत्तस्य वासस्थानस्य अन्वेषणं कष्टाय न जातम्।

अश्विनीदत्तः ब्रह्मचारी। इन्दुमती यदा तस्य गृहं प्राप्तवती तदा सः पाकं सज्जीकुर्वन्



आसीत् । द्वारताडनशब्दं श्रुत्वा अश्विनीदत्तः एव आगत्य द्वारम् उद्घाटितवान् ।

अश्विनीदत्तं दृष्ट्वा इन्दुमती - ''महता कष्टेन सुदूरात् आगता अस्मि अहम् । पुत्रभिक्षया माम् अनुग्रहीतुं भवान् एव समर्थः'' इति वदन्ती तं नमस्कृतवती । दुःखेन तस्याः नेत्राभ्याम् अश्रुबिन्दवः पतिताः ।


एतत् दृष्ट्वा अश्विनीदत्तः - ''अम्ब ! दुःखं मा करोतु भवती । सर्वं शुभमयं भविष्यति । 'सुदूरात् आगतवती' इति वदन्ती अस्ति भवती । अतः प्रथमं भोजनं करोतु'' इति वदन् इन्दुमत्यै, तया सह आगतायै दास्यै च भोजनपरिवेषणार्थम् उद्युक्तः ।


भोजनस्य समाप्तेः अनन्तरम् इन्दुमती स्वयमलपुत्रयोः विषयं, शस्त्रचिकित्सा-विषयं च अश्विनीदत्तं निवेदितवती ।

इन्दुमत्या उक्तं श्रुत्वा अश्विनीदत्तः ताम् उद्दिश्य - ''भवत्याः पुत्रयोः कोऽपि क्लेशः न भवति । अहं शस्त्रचिकित्साकार्यं निर्वर्तयामि । भवत्याः ग्रामः इतः कियत् दूरे अस्ति ?'' इति पृष्टवान् ।

''इन्द्रपुरं मम राज्यम् । अहम् इन्द्रपुरस्य महाराज्ञी अस्मि'' इति निर्भयेन उक्तवती इन्दुमती ।

इन्दुमत्याः एतत् वचनं श्रुतवतः अश्विनीदत्तस्य शरीरे कम्पनम् आरब्धम् । मुखं कान्तिहीनम् अभवत् । सः उक्तवान् - ''एतस्याः शस्त्रचिकित्सायाः अनन्तरं चन्द्रगिरेः राजा मां मारयेत् । एषः विषयः भवत्या ज्ञातः एव स्यात् इति चिन्तयामि अहम्'' इति ।





तदा इन्दुमती प्रार्थितवती - ''केनापि प्रकारेण भवतः प्राणहानिः न भविष्यति इति अहं वचनं ददामि । भवान् कृपया मयि विश्वस्य मम आशां पूरयतु'' इति।

अश्विनीदत्तः क्षणकालं विचिन्त्य ''भवतु, गच्छाम'' इति वदन् गृहं कीलयित्वा इन्दुमत्या सह प्रस्थितः । दिनद्वयानन्तरं ते इन्द्रपुरं प्राप्तवन्तः । अनन्तरदिने एव अश्विनीदत्तः शस्त्रचिकित्साद्वारा यमलयोः पुत्रयोः शरीरं पृथक्कृतवान् । अश्विनीदत्तस्य शस्त्रचिकित्साकौशलम् अपूर्वम् इति इन्द्रपुरजनाः सर्वे प्रशंसापूर्वकं तम् अभिनन्दितवन्तः।

तस्मिन् एव दिने जयसिंहः इन्दुमती च समग्रे राज्ये प्रकटनं कारितवन्तौ - ''परस्परं युक्तयोः यमलयोः शरीरं शस्त्रचिकित्साद्वारा पृथक्कृत्य इन्द्रपुरस्य वंशं रक्षितवान् महानुभावः चन्द्रगिरिराज्यस्य आस्थानवैद्यः अश्विनीदत्तः। तस्मै इन्द्रपुरस्य राजा, राज्ञी, प्रजाः च कृतज्ञताः समर्पयन्ति'' इति।

अनन्तरदिने एषा वार्ता प्रतिवेशिराज्येषु अपि प्रसृता।

स्ववंशस्य रक्षकाय अश्विनीदत्ताय उपायनं दातुम् उद्युक्ताम् इन्दुमतीं निवारयन् अश्विनीदत्तः - ''महाराज्ञि ! भवत्या महान् उपकारः कृतः । तदर्थम् अहं भवत्यै कृतज्ञताः समर्पयामि'' इति उक्त्वा स्वराज्यं प्रतिगतवान्।

वेतालः एवं कथां समाप्य अवदत् - ''राजन् ! इन्दुमत्या अश्विनीदत्ताय यत् वचनं दत्तम् आसीत्, तस्य भङ्गः जातः खलु ! तस्य प्राणहानिः यथा न भवेत्, तथा व्यवस्थां करोमि इति इन्दुमत्या वचनं दत्तम् आसीत्। एवं सति 'युक्तयोः यमलयोः शरीरं पृथक्कृतम्' इति विषयः प्रकटनद्वारा राज्ये सर्वत्र प्रसारितः इति यत् तस्य तात्पर्यम् अश्विनीदत्तस्य प्राणहानिः जाता इत्येव खलु ! एषः अपायकरः विषयः इति जानन् अपि अश्विनीदत्तः शस्त्रचिकित्साकरणं किमर्थम् अङ्गीकृतवान् ? अपि च शस्त्रचिकित्सायाः अनन्तरं 'भवत्या महान् उपकारः कृतः' इति अश्विनीदत्तः किमर्थम् इन्दुमतीम् उक्तवान् ? एतेषां सन्देहानां समाधानं जानन् अपि यदि भवान् न वदेत्,

तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''वैद्यशास्त्रे निपुणः अश्विनीदत्तः स्वजीवनं वैद्यकीयसेवार्थम् एव अर्पितवान् अस्ति । स्वकार्यस्य विघ्नः न भवेत् इति कारणतः एव सः ब्रह्मचारित्वेन स्थितवान्। प्रामाणिकः विवेकी च वैद्यः चिन्तयति यत् - शत्रुः चेदपि यदि रोगेण पीडितः भवति, तर्हि तस्य चिकित्साकरणं प्रथमं कर्तव्यम् इति । एतस्मात् कारणात् एव स्वजीवितान्त्यं जानन् अपि अश्विनीदत्तः शस्त्रचिकित्सां कर्तुं इन्दुमत्या सह प्रस्थितः। किन्तु तादृशी शस्त्रचिकित्सा तेन एव कर्तुं शक्या, यश्च वैद्यशास्त्रस्य सूक्ष्मान् अंशान् जानाति । तादृशः सूक्ष्ममतिः ऋते अश्विनीदत्तात् न कोऽपि आसीत् परितः स्थितेषु राज्येषु अपि। अतः शस्त्रचिकित्सा अश्विनीदत्तेन एव कृता इति चन्द्रगिरेः राजा रुद्रसेनः जानीयात् एव। अपि च सः शत्रोः वंशरक्षकम् अश्विनीदत्तं कठोरं दण्डयेत् अपि । एतम् अपायं ज्ञात्वा इन्दुमती अश्विनीदत्तस्य नाम सर्वैः ज्ञातव्यम् इत्येव कृतज्ञतासमर्पणव्याजेन राज्ये सर्वत्र प्रकटनं कारितवती। एवं करणेन वृत्तिधर्मं पालयितुं स्वप्राणान् अपि पणीकृत्य शत्रुराज्ये कृतज्ञताः प्राप्तवन्तं, स्वराज्यस्य गौरवस्य कारणीभूतम् अश्विनीदत्तं दण्डयितुं रुद्रसेनस्य धैर्यं न भवति। अकस्मात् सः दण्डयितुम् इच्छति चेदपि जनाः आवश्यं विरोधं प्रकटयन्ति। एतस्मात् अन्तरङ्गे इच्छा नास्ति चेदपि लोकभयात् अश्विनीदत्तस्य विजयः चन्द्रगिरिराज्ञा रुद्रसेनेन अभिनन्दनीयः एव । एवं महतीम् अपि समस्याम् उपायेन परिहृतवती इन्दुमती । अतः एव अश्विनीदत्तः तस्यै कृतज्ञताः समर्पितवान्। एतैः कारणैः ज्ञायते यत् - इन्दुमत्या वचनभङ्गः न कृतः, न वा कृतघ्नता आचरिता इति'' इति।

एवं यदा राज्ञः मौनभङ्गः जातः, तदा शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा यथापूर्वं वृक्षस्य शाखाम् अवलम्बितवान्।






# देशभक्तिः

परिश्रमः यावान् वा भवतु, उद्दिष्टं कार्यं साधनीयम् एव इति चिन्तयन् त्रिविक्रमः पुनरपि वृक्षस्य समीपं गत्वा शाखायां लम्बमानं शवं स्कन्धे आरोप्य मौनं श्मशानाभिमुखं प्रस्थितवान् । तदा शवान्तर्गतः वेतालः अवदत् - ''अये राजन्! भयजनके अस्मिन् श्मशाने महान्तं परिश्रमं वहन् भवान् महत् कष्टम् अनुभवन् अस्ति । एतावता अपि भवतः लक्ष्यं किं स्यात् इत्येव मया न ज्ञातम् । मयि सन्देहः उदेति यत् - भवान् एतादृशं परिश्रमं स्वनिमित्तं कुर्वन् नास्ति, अपि तु कस्यचित् स्वार्थिनः निमित्तं कुर्वन् अस्ति इति । कस्यचित् राज्यस्य राजा भवान् विवेकी लोकज्ञाननिपुणः च इत्यत्र नास्ति मम सन्देहः । तथापि महाज्ञानिनः विवेकिनः अपि कदाचित् मानसिक-दौर्बल्यकारणात् अविवेकेन व्यवहरन्ति । एतस्य निदर्शनार्थं सुन्दरराजनामकस्य

## वेतालकथा



राजगुरोः कथां श्रावयामि । श्रद्धया शृणोतु तावत्'' इति।

अनन्तरं वेतालेन कथा आरब्धा -

श्वेतद्वीपं परिपालयतः महाराजस्य एकमात्रं पुत्रः आसीत् । राजा राज्ञी च पुत्रम् अत्यन्तं वात्सल्येन पालयतः स्म ।

राजकुमारः स्वस्य षष्ठवर्षस्य जन्मदिनोत्सवदिने क्रीडार्थं वाटिकां गतः न प्रत्यागतः एव । राजभटैः बहुधा अन्विष्टः सः । तथापि राजकुमारः न प्राप्तः एव ।

श्वेतद्वीपस्य प्रतिवेशिराज्यं हरितद्वीपनामकम् । बहोः कालात् एतयोः राज्ययोः मध्ये द्वेषः आसीत् । किन्तु शक्तौ युक्तौ च राज्यद्वयम् अपि समबलयुतम् आसीत् इत्यतः तयोः मध्ये परस्परम् आक्रमणं न प्रचलति स्म ।

स्वपुत्रस्य अदर्शनात् श्वेतद्वीपस्य राज्ञि सन्देहः उत्पन्नः यत् - एतत् हरितद्वीपस्य राज्ञः कुतन्त्रं स्यात् इति । तस्य सन्देहस्य दृढीकरणाय इव अकस्मात् हरितद्वीपस्य सुन्दरराजनामकः राजगुरुः श्वेतद्वीपस्य समुद्रतीरे राजभटैः प्राप्तः ।

सुन्दरराजः ज्ञानी विवेकी च । सः पशुपक्षिणां भाषाः, तेषां व्यवहारादिकं च अवगच्छति स्म ।

हरितद्वीपस्य राजकुमारस्य पट्टाभिषेककार्यक्रमः निश्चितः आसीत् । मित्रराज्यानां महाराजेभ्यः पट्टाभिषेककार्यक्रमस्य आह्वानपत्रिकाः दातुं सुन्दरराजः हरितद्वीपतः प्रस्थितः आसीत् । किन्तु मध्येमार्गं चण्डमारुतकारणात् तदीया नौका मार्गभ्रष्टा जाता । तस्मात् सुन्दरराजः श्वेतद्वीपस्य समुद्रतीरं प्राप्तवान् आसीत् ।

श्वेतद्वीपस्य राजा बहुभिः प्रश्नैः सुन्दरराजस्य परीक्षां कृतवान् । तस्य उत्तरेण श्वेतद्वीपस्य राज्ञा ज्ञातं यत् - सुन्दरराजः राजकुमारस्य अदृश्यतां न जानाति इति । तथापि राजा सुन्दरराजस्य प्रतिगमनार्थम् अनुमतिं न दत्तवान् । अपि तु सः सकलविद्यापारङ्गताय सुन्दरराजाय स्वपुत्रस्य राजकुमारस्य अन्वेषणदायित्वं दत्तवान् ।

श्वेतद्वीपस्य राजकुमारः कुत्र स्यात्, केन प्रकारेण तस्य अन्वेषणं साध्यम् इति न

जानाति स्म सुन्दरराजः । किन्तु एतत् तु निश्चितं यत् - राजकुमारस्य अन्वेषणकार्यं साधितं चेत् एव स्वराज्यं प्रति गन्तुम् अनुमतिः प्राप्यते इति ।

सुन्दरराजः एवं यदा चिन्तयन् आसीत्, तदा समुद्रात् कश्चित् गृध्रः श्वेतद्वीपस्य दुर्गस्य दिशि एव आगतवान् । सुन्दरराजः गृध्रम् एव पश्यन् स्वकीयम् अङ्गुष्ठम् उन्नीय वायौ इतस्ततः चालयन् उच्चस्वरेण सरागम् अर्धघण्टां यावत् ध्वनिम् उत्पादितवान् । एतत् श्रुत्वा गृध्रः किमपि ज्ञातवान् इव दुर्गं परितः पञ्चषवारं भ्रमणं कृत्वा ततः वेगेन गत्वा अनतिदूरे स्थितायाः वाटिकायाः वटवृक्षे उपविष्टवान् । तत्क्षणम् एव तस्मिन् वृक्षे स्थिताः पक्षिणः कलरवम् आरब्धवन्तः ।

गृध्रस्य एतस्मात् व्यवहारात् सुन्दरराजः किमपि अवगतवान् इव तृप्त्या शिरः चालयन् ततः वाटिकां गतवान् । वाटिकां प्रति तस्य गमनेन पक्षिणां कलरवः स्थगितः अभवत् । वटवृक्षस्य शाखायां नीडस्य निर्माणं कुर्वन् आसीत् कश्चित् पक्षी । सः सुन्दरराजं दृष्ट्वा विचित्रस्वरेण शब्दं कुर्वन् ततः वृक्षस्य कोटरसमीपं गत्वा 'कीच् कीच्' इति शब्दम् अकरोत् । एतस्मात् अतीव सन्तुष्टः सुन्दरराजः करताडनेन स्वसन्तोषं प्रकटयन् वृक्षस्य कोटरसमीपं गतवान् ।

सुन्दरराजः कोटरं प्रविश्य किञ्चिद्दूरं गतवान् । तत्र अन्तरट्टे सामान्यतः



पञ्चपादपरिमितोन्नतं मधुपात्रम् आसीत् । पात्रे प्लवमानं कन्दुकम् एकं सुन्दरराजेन दृष्टम् । 'राजकुमारेण वाटिकायां कन्दुकेन क्रीडनसमये कन्दुकं कोटरे पतितम् अभवत् । तत् अन्विष्यन् गतः राजकुमारः मधुपात्रम् आरूढवान् । तदा अकस्मात् मधुपात्रे पतितः सः तत्रैव निमग्नः' इति तर्कितवान् सुन्दरराजः ।

ततः सुन्दरराजः राजभवनं गत्वा एतां दुःखदायिनीं वार्तां राजानं निवेदितवान् । राजा भटानां द्वारा मधुपात्रतः राजकुमारं निष्कासितवान् । राजा पुत्राय राजकुमाराय राजोचितं वेषं धारयित्वा मञ्चस्य उपरि राजकुमारं शायितवान् ।

अनन्तरं सः सुन्दरराजम् उक्तवान् -



''अस्माभिः साधयितुम् अशक्यं कार्यं भवान् सुलभतया साधितवान् अस्ति । भवान् महाशक्तिशाली अस्ति । राजकुमारः मृतः इति तु अस्माकं दौर्भाग्यम् । किन्तु इदानीं राजकुमारस्य प्राणदानं भवता एव करणीयम्'' इति ।

एतत् श्रुत्वा कुपितः सुन्दरराजः - ''सर्वथा अशक्यम् एतत् । मनुष्यमात्रस्य जननमरणम् अत्यन्तं सहजम् । अहम् अपि मृतः भविष्यामि । भवन्तः अपि कालान्तरे मरणं प्राप्स्यन्ति एव । एवं सति मृतम् उज्जीवयितुं कस्य सामर्थ्यं स्यात्?'' इति पृष्टवान् ।

''एतद्विषये किं करणीयम् इति भवान् एव चिन्तयतु । यावत् मम पुत्रस्य उज्जीवनं न भविष्यति, तावत् भवान् इतः गन्तुं न शक्ष्यति । इतः भवतः बहिर्गमनं न तावत् सुलभम् । सर्वत्र रक्षकभटाः व्यवस्थापिताः सन्ति मया । यदि भवान् इतः पलायनार्थं प्रयत्नं करोति, तर्हि मम पुत्रस्य समीपे एव भवन्तं बन्धने स्थापयिष्यामि'' इति उक्त्वा राजा ततः गतवान् ।

राज्ञः अज्ञानं स्वार्थं च मनसा एव निन्दन् सुन्दरराजः तत्रैव कस्मिंश्चित् शिलासने उपविष्टवान् । तावता कुतश्चित् आगतौ द्वौ वानरौ झटिति उत्प्लुत्य वटवृक्षे उपविष्टवन्तौ । क्षणाभ्यन्तरे तयोः अन्यतरः वानरः कर्णकठोरं 'कीच्' कुर्वन् वृक्षशाखातः अधः पतितवान् । वृक्षशाखाम् आवृत्य स्थितः कृष्णसर्पः तं वानरं दष्टवान् आसीत् इत्यतः सः तथा पतितवान् आसीत् ।

अत्रान्तरे द्वितीयः वानरः वृक्षशाखातः अधः आगत्य निश्चलं पतितां प्रियतमां परीक्षितवान् । स्वप्रियतमा मृता इति ज्ञात्वा सः वानरः कोपेन वृक्षस्थं कृष्णसर्पं दृष्ट्वा बलात् स्वहस्तेन भूमौ घट्टयित्वा ततः वेगेन धावितवान् ।

एतत् सर्वम् अवलोकितवतः सुन्दरराजस्य मुखे मन्दहासः । सः शिलासनात् उत्थाय इतस्ततः भ्रमणम् आरब्धवान् ।

घण्टातः पूर्वं वेगेन धावन् गतः वानरः धावन् एव प्रत्यागतवान् । तस्य हस्ते

लघुसर्पाकारिका मूलिका आसीत् ।

वानरः तां मूलिकां भूमौ पतितायाः प्रियतमायाः शिरसि स्थापयित्वा मुखेन त्रिवारं वायुवीजनम् अकरोत् । अपरक्षणे एव सा वानरी नेत्रे उन्मील्य अङ्गभङ्गं कुर्वती उत्थितवती ।

तस्मिन् एव समये सुन्दरराजः वानरयोः समीपं गत्वा उच्चैः हूँकुर्वन् हस्तम् उपरि कृतवान् । एतस्मात् भीतौ वानरौ मूलिकां सुन्दरराजाय दत्त्वा ततः निर्गतवन्तौ ।

सुन्दरराजः तां मूलिकां राजकुमारस्य शिरसि संस्थाप्य मुखेन त्रिवारं वायुं वीजितवान् । अपरक्षणे एव राजकुमारः निद्रातः इव उत्थाय उपविष्टवान् । सुन्दरराजः 'एषा शुभवार्ता राज्ञे निवेदनीया' इति रक्षकभटान् उक्तवान् ।


रक्षकभटाः राजभवनं गत्वा महाराजं शुभवार्तां निवेदितवन्तः । एतस्मात् नितरां सन्तुष्टौ महाराजः राज्ञी च वाटिकां गत्वा वात्सल्येन पुत्रम् आलिङ्गितवन्तौ ।

पुत्रं राजकुमारम् उज्जीवितवते सुन्दरराजाय प्रभूतं धनं दत्त्वा तं वैभवेन सत्कृतवान् राजा ।

तदा सुन्दरराजः श्वेतद्वीपस्य राजानम् उक्तवान् - ''महाराज ! अहं धनं न इच्छामि । कृपया यावच्छीघ्रं मां मम राज्यं प्रति प्रेषयतु'' इति ।

सुन्दरराजस्य एतत् वचनम् अङ्गीकर्तुम् अनिच्छन् राजा राजा शिरः चालयन् - ''इदानीम् एव भवन्तम् इतः प्रेषयितुं न इच्छामि अहम् । राजकुमारस्य अन्वेषकः अपि भवान् एव । प्राणदाता





अपि भवान् एव । अतः तस्य विद्याभ्यासदायित्वम् अपि भवतः एव । सकलविद्याः तं पाठयित्वा तम् अपि भवत्सदृशं मेधाविनं करोतु भवान् । अनन्तरं भवतः प्रेषणव्यवस्थां करिष्यामि अहम् '' इति उक्त्वा पुनः सुन्दरराजस्य वचनं श्रोतुम् अनिच्छन् ततः निर्गतवान् एव ।

एतस्मात् सुन्दरराजः अतीव खिन्नः । किन्तु राजाज्ञायाः पालनं विना उपायान्तरं न आसीत् तस्य । अतः सः राजकुमारं स्वशिष्यत्वेन अङ्गीकृत्य आत्मना ज्ञाताः सर्वाः विद्याः राजकुमारं बोधितवान् ।

शिष्यस्य राजकुमारस्य विद्याभ्यास-समाप्त्यनन्तरं सुन्दरराजः कदाचित् सभायां राजकुमारस्य परीक्षाम् आयोजितवान् । सर्वासु परीक्षासु राजकुमारः उत्तीर्णः जातः । तत्र राजकुमारस्य बुद्धिमत्तां दृष्ट्वा सभासदः सर्वे अतीव आश्चर्यचकिताः । महाराजः तु अतीव सन्तुष्टः ।

अनन्तरदिने एव राजा सुन्दरराजस्य प्रयाणार्थं नौकां सज्जीकृतवान् । सुन्दरराजाय बहूनि उपायनानि दत्तवान् । पित्रा सह आत्मानं प्रेषयितुं समुद्रतीरम् आगतं राजकुमारम् उद्दिश्य सुन्दरराजः - ''प्रमुखं मन्त्रम् एकं भवन्तं पाठयितुं विस्मृतवान् अहम् । तं मन्त्रम् इदानीं भवन्तं बोधयिष्यामि अहम् । मया कथ्यमानं मन्त्रं जपता भवता अञ्जलिपूर्णं जलं स्वीकृत्य अन्यस्मिन् अञ्जलौ स्थापनीयम् । अनन्तरं मम नौकायाः अदर्शनपर्यन्तम् अपि मुखस्य एकाग्रता न लोपनीया '' इति उक्त्वा तस्य कर्णे मन्त्रम् उपदिष्टवान् ।

गुरुणा यथा उक्तं, तथैव आचरितवान् राजकुमारः । अनन्तरं राजकुमारः पित्रा सह अन्तःपुरं गत्वा गुरुणा सुन्दरराजेन प्रस्थानसमये उपदिष्टं मन्त्रं पितरं वक्तुम् इच्छन् मुखम् उद्घाटितवान् । किन्तु राजकुमारेण सः मन्त्रः विस्मृतः आसीत् । न केवलं मन्त्रः, अपि तु सुन्दरराजेन बोधिताः सर्वाः विद्याः अपि विस्मृताः आसन् राजकुमारेण ।

वेतालः एवं कथां समाप्य अवदत् - ''अये राजन्! सुन्दरराजस्य व्यवहारः

नीचः इति भाति खलु! यतः प्राणदानपूर्वकं श्वेतद्वीपस्य राजकुमारं सर्वाः विद्याः बोधितवान् सुन्दरराजः एव। किन्तु सः एव सुन्दरराजः स्वराज्यं प्रति प्रस्थानसमये नूतनं प्रमुखं च कश्चित् मन्त्रम् उपदिशामि इति राजकुमारम् उक्त्वा तं किमर्थं वञ्चितवान्? पाठिताः सर्वाः विद्याः किमर्थं प्रतिस्वीकृतवान् सः? शिष्यः गुरुम् एव पराजयेत इति भीत्या तथा कृतवान् वा सः? भाविनि काले राजकुमारात् आत्मनः विपत्तिः सम्भवेत् इति भयेन वा? महाज्ञानी विवेकी च सन् अपि सुन्दरराजः स्वकीयेन एतादृशेन व्यवहारेण अविवेकी सञ्जातः खलु! एतेषां सन्देहानां समाधानं जानन् अपि यदि भवान् न वदेत्, तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''हरितद्वीपस्य राजगुरोः सुन्दरराजस्य, श्वेतद्वीपस्य राजकुमारविषये अभिमानः स्यात् इति कथनस्य प्रसक्तिः एव नास्ति। यतः सः अभिमानेन राजकुमारं न बोधितवान्। अपि तु श्वेतद्वीपस्य राज्ञः दुराग्रहकारणतः तस्मात् राज्यात् स्वस्य मुक्तिप्राप्त्यर्थं च सः राजकुमारं बोधितवान्। विवेकी कोऽपि शत्रुदेशीयम् अपूर्वाः विद्याः बोधयितुं न इच्छति। तदेव तस्य देशभक्तिं द्योतयति। किन्तु श्वेतद्वीपात् आत्मनः रक्षणार्थं सुन्दरराजेन अनिवार्यतया अपूर्वाः अपि विद्याः बोधनीयाः आपतिताः। व्यक्तिः, कुटुम्बम्, समाजः, देशः, इत्यादिवलयेषु व्यक्तेः वलयः न विशालः। देशः व्यक्तेः अपेक्षया विशालः। स्वदेशस्य गौरवं मनसि निधाय देशभक्तः सुन्दरराजः तथा व्यवहृतवान्। एतस्मात् सिद्धं यत् तेन अविवेकिता आचरिता इति कथनं न युक्तम् इति'' इति।

एवं राज्ञः मौनभङ्गः यदा जातः, तदा शवान्तर्गतः बेतालः ततः अदृश्यः भूत्वा यथापूर्वं श्मशानस्थस्य वृक्षस्य शाखाम् अवलम्बितवान्।





# जयदेवस्य विजयः

आरब्धे कार्ये असाफल्यं प्राप्नुवन् अपि त्रिविक्रमः पुनरपि वृक्षस्य समीपं गत्वा शवं स्कन्धे आरोप्य मौनं श्मशानाभिमुखं प्रस्थितवान् । तदा शवान्तर्गतः वेतालः अवदत् - ''राजन्! अस्मिन् मध्यरात्रसमये भवान् महान्तं परिश्रमं वहन् अस्ति इति यत् तेन अहं चिन्तयामि - 'भवान् महान् शक्तिमान्, सामर्थ्यवान् च' इति । भवादृशाः शक्तिमन्तः अपि कदाचित् असाफल्यं प्राप्य अपमानिताः भवन्ति । एतस्य कारणं प्रतिस्पर्धिनः शक्तिसामर्थ्यस्य अज्ञानं वार्धक्यं वा । भवतः अपि एतादृशी स्थितिः कदाचित् भवेत् । अतः भवता जागरूकेण भवितव्यम् इति स्मारयितुम् इच्छामि अहम् । एतस्य निदर्शनार्थं जयदेव-प्रतापरुद्रयोः कथां श्रावयामि । श्रद्धया शृणोतु तावत्'' इति ।

अनन्तरं वेतालेन कथा आरब्धा -

## वेतालकथा



जयदेवनामकः युवकः कल्याणपुरे वसति स्म । सः बाल्ये एव पण्डितानां सकाशात् श्रद्धया शास्त्र-साहित्यगानादीनाम् अध्ययनं कृतवान् आसीत् । निपुणानां योधानां सकाशात् शस्त्रयुद्धं गदायुद्धं च अभ्यस्तवान् आसीत् सः । एतस्मात् तस्य महान् गर्वः आसीत् ।

कदाचित् जयदेवस्य पिता पुत्रम् उक्तवान् -''विजयनगरस्थं प्रतापरुद्रं भवान् जानीयात् खलु! सः अपि सर्वविद्यासु सर्वशास्त्रेषु च अग्रगण्यः अस्ति'' इति ।

एतत् श्रुत्वा जयदेवः प्रतापरुद्रेण सह स्पर्धितुम् इच्छन् विजयनगरं प्रति प्रस्थितः । मार्गे मल्लयोधः कश्चित् जयदेवेन मिलितः । सः जयदेवस्य आशयं ज्ञात्वा तम् उक्तवान् - ''मया अपि एतावता चतुर्वारं मल्लयुद्धस्पर्धार्थं गतम् आसीत् । चतुर्वारम् अपि मया पराजयः प्राप्तः । तथापि केचन सूक्ष्मविचाराः मया ज्ञाताः सन्ति । अतः भवान् प्रथमं मया सह मल्लयुद्धं कृत्वा जयं सम्पाद्य प्रतापरुद्रस्य समीपं गच्छतु'' इति ।

जयदेवः मल्लयोधेन सह मल्लयुद्धकरणम् अङ्गीकृतवान् । क्षणाभ्यन्तरे जयदेवः पराजितः जातः । तदा जयदेवः मल्लयोधसकाशात् कांश्चन सूक्ष्मविचारान् ज्ञातवान् । चतुर्णां दिनानाम् अनन्तरं सः मल्लयोधं जेतुं समर्थः जातः । तदा मल्लयोधः जयदेवं प्रशंसन् उक्तवान् - ''भवान् अवश्यं प्रतापरुद्रं जेतुं शक्नोति'' इति ।

चत्वारि दिनानि अतीतानि । जयदेवः प्रतापरुद्रं मल्लयुद्धार्थम् आहूतवान् । युद्धे जयदेवः पराजितः अभवत् । तदा प्रतापरुद्रः जयदेवम् उक्तवान् - ''यद्यपि भवान् पराजितः, तथापि मल्लयुद्धस्य सुक्ष्मान् कांश्चन अंशान् ज्ञातवान् अस्ति । मम शिष्यत्वेन कानिचन दिनानि तिष्ठतु भवान्'' इति ।

एतत् श्रुत्वा कुपितः जयदेवः - ''भवान् अपि बह्वीः विद्याः जानाति । तासु कस्याञ्चित् विद्यायां वा भवन्तं जित्वा एव भवतः शिष्यत्वेन स्थास्यामि अहम्'' इति उक्त्वा ततः निर्गतवान् ।

विजयनगरे वीरसेननामकः कश्चित् योधः आसीत् । खड्गविद्यायां सः निपुणः आसीत् । तथापि सः प्रतापरुद्रेण सह कृते खड्गयुद्धे पराजयं प्राप्तवान् आसीत् । वार्धक्यकारणतः वीरसेनः चिन्तयन् आसीत् यत् - कस्मैचित् वीरयुवकाय खड्गविद्याशिक्षणं दत्त्वा तस्य द्वारा प्रतापरुद्रः जेतव्यः इति ।

तेषु एव दिनेषु सः जयदेवविषये श्रुतवान् । सः जयदेवम् आहूय खड्ग-विद्यपरीक्षाम् आयोजितवान् । जयदेवस्य खड्गविद्यानैपुण्यं दृष्ट्वा वीरसेनस्य समाधानं जातम् । तथापि कांश्चन मासान् यावत् खड्गविद्याविषये जयदेवाय विशेष-शिक्षणं दत्त्वा युद्धार्थं प्रतापरुद्रसमीपं प्रेषितवान् । प्रतापरुद्रः तु सुलभतया जयदेवं जितवान् ।

एतस्याः घटनातः खिन्नः जयदेवः चिन्तितवान् - 'अद्यपर्यन्तम् अपि अहम् आत्मानं महाशूरं चिन्तयन् आसम् । मदपेक्षया अपि शूराः वीराः च सन्ति अस्मिन् विजयनगरे । तादृशानां सकाशात् मल्लविद्यायां खड्गविद्यायां च विशेषशिक्षणं प्राप्य अपि प्रतापरुद्रं जेतुं न शक्तवान् अहम्' इति ।

अनन्तरदिनेषु जयदेवः प्रतापरुद्रेण सह गदायुद्धे धनुर्विद्यायां च स्पर्धित्वा पराजितः जातः । सः प्रतापरुद्रं प्रार्थितवान् - ''भवतः सामर्थ्यं पूर्वं न ज्ञातवान् अहम् । कृपया मां शिष्यत्वेन स्वीकरोतु'' इति ।

तदा प्रतापरुद्रः मन्दहासपूर्वकम् उक्तवान् - ''भवान् महावीरः इत्यत्र नास्ति सन्देहः । अपि च भवन्तम् अवश्यं मम





शिष्यत्वेन स्वीकरिष्यामि अहम् । किन्तु एकः नियमः । पूर्वं भवता उक्तम् आसीत् यत् - कस्याञ्चित् विद्यायां वा जित्वा एव भवतः शिष्यत्वेन स्थास्यामि इति । तदनुसारम् एकस्यां विद्यायां वा भवता अहं जेतव्यः । तदा अहं भवन्तं शिष्यत्वेन स्वीकरिष्यामि'' इति ।

एतत् श्रुत्वा जयदेवः 'पुनरपि प्रतापरुद्रः प्रार्थनीयः' इति क्षणं चिन्तितवान् । किन्तु स्वाभिमानवशात् न प्रार्थितवान् सः । अपि तु सः निर्णीतवान् यत् - एकस्यां विद्यायां वा प्रतापरुद्रः जेतव्यः एव इति । किन्तु तत् असाध्यम् इति जानाति स्म जयदेवः । एतस्मात् अतीव दुःखितः जयदेवः आत्महत्यां कर्तुम् इच्छन् नगरसमीपस्थं नदीतीरं गतवान् ।

नदीतीरे कश्चित् संन्यासी उपविष्टवान् आसीत् । सः जयदेवं दुःखस्य कारणं पृष्टवान् । जयदेवः प्रवृत्तं सर्वं संन्यासिनं निवेदितवान् ।

तदा संन्यासी उक्तवान् - ''वत्स! भवतः मुखे दिव्यं तेजः दृश्यते । अतः भवान् वेदान्तस्य अध्ययनं करोतु । वेदान्तविषये भवन्तं जेतुं कोऽपि न शक्नोति । वेदान्ताध्ययनेन भवान् प्रतापरुद्रम् अपि जेतुं शक्नोति'' इति ।

संन्यासिनः वचनश्रवणात् जयदेवस्य उत्साहः प्रवृद्धः । संन्यासिनः वचनानुसारं षण्मासान् यावत् तस्य सकाशात् एव वेदान्तस्य अध्ययनं कृतवान् जयदेवः । अनन्तरं सः संन्यासिनम् उक्तवान् - ''स्वामिन्! वेदसागरः गभीरः अस्ति । अल्पं वेदज्ञानं प्राप्तवति मयि इदानीं ज्ञानोदयः जातः अस्ति । अतः इदानीं प्रतापरुद्रसमीपं गमनार्थं मह्यम् अनुमतिं ददातु भवान्'' इति ।

संन्यासी सन्तोषेण जयदेवम् आशिषा अनुगृहीतवान् । अनन्तरं जयदेवः नगरं प्रत्यागत्य प्रतापरुद्राय वार्तां प्रेषितवान् यत् भवत्सकाशम् आगच्छन् अस्मि इति ।

अत्रान्तरे जयदेवस्य वेदान्तज्ञानविषये प्रतापरुद्रः श्रुतवान् आसीत् । सः अपि जयदेवाय वार्तां प्रेषितवान् - ''भवतः सदा स्वागतम्'' इति ।


प्रतापरुद्रेण सह जयदेवः वेदान्तविषये

चर्चां करिष्यति इति वार्ता नगरजनैः ज्ञाता । एतं कार्यक्रमं द्रष्टुं पण्डिताः, पामराः, नागरिकाः सर्वे आगतवन्तः । प्रतापरुद्रेण बहुवारं जयदेवः पराजितः चेदपि जयदेवस्य तेजोमयं मुखं, गाम्भीर्यं च दृष्ट्वा जनाः आश्चर्यचकिताः । अपि च जनाः चिन्तयन्ति स्म - "जयदेवः प्रतापरुद्रसदृशः वीरः न चेदपि तस्मिन् महत् नैपुण्यम् अस्ति । अतः कदाचित् सः विजयी भविष्यति एव" इति ।

निश्चिते समये सभा आरब्धा ।

आरम्भे प्रतापरुद्रः जयदेवम् उद्दिश्य - "भवान् मल्लयुद्धे, खड्गयुद्धे, गदायुद्धे, धनुर्विद्यायां, शास्त्रचर्चायां च मया सह स्पर्धित्वा पराजयं प्राप्तवान् अस्ति । इदानीं वेदान्तविषये भवता ज्ञातान् विचारान् मां वदतु भवान् । अहं यथाशक्ति भवता उक्तस्य व्याख्यानं करोमि । यदि मया सम्यक् व्याख्यानं क्रियते, तर्हि भवतः पराजयः । नो चेत् मम पराजयः । एतत् भवतः सम्मतं वा?" इति पृष्टवान् उत्साहेन ।

तदा जयदेवः मन्दहासपूर्वकम् उक्तवान् - "वेदान्तस्य अध्ययनात् अहं मां सम्यक् अवगतवान् अस्मि । मया ज्ञातम् अल्पम् । ज्ञातव्यं बहु अस्ति । भवतः अपेक्षया अपि अहम् एव अधिकं जानामि इति गर्वः नास्ति मम । मम अज्ञानम् अहङ्कारं च भवान् दृष्टवान् अस्ति । कृपया मां क्षाम्यतु । शिष्यत्वेन स्वीकरोतु ।



'गभीरस्य वेदान्तस्य विषये व्याख्यानं करोतु' इति कृपया मा वदतु माम्" इति ।

जयदेवस्य एतत् वचनं श्रुत्वा आश्चर्यचकितः प्रतापरुद्रः उक्तवान् - "मया बह्व्यः विद्याः ज्ञाताः सन्ति । अतिरथमहारथान् अपि जितवान् अस्मि अहम् । वेदान्तविचारः सामान्यः इति विचिन्त्य तम् अहम् उपेक्षितवान् आसम् । अतः मम अहम्भावः इतोऽपि न अपगतः । किन्तु वेदान्तशास्त्रस्य अध्ययनेन भवतः अहम्भावः अपगतः अस्ति । अतः एतद्विषये मया पराजयः प्राप्तः । अतः वेदान्तविषये भवान् मां शिष्यत्वेन अङ्गीकरोतु । अन्यविषयेषु अहं भवन्तं शिष्यत्वेन अङ्गीकरोमि" इति ।

वेतालः एवं कथां समाप्य अवदत् - ''अये राजन्! जयदेवस्य प्रतापरुद्रस्य च व्यवहारेण ज्ञायते यत् - तयोः वाक्चातुर्येण परस्परप्रशंसया च विषयः सङ्कीर्णः जातः अस्ति इति । अन्यः कोऽपि विशेषः न दृश्यते । लोके केचन पण्डिताः तार्किकाः इव केवलं वादं कुर्वन्ति, न तु सन्दर्भोचितं व्यवहरन्ति । जयदेव-प्रतापरुद्रयोः व्यवहारः अपि एवमेव भासते । सर्वप्रकारेण अपि प्रतापरुद्रः एव धीमान्, शक्तिमान्, सामर्थ्यवान् च इति तु सुस्पष्टम् । जयदेवस्य ज्ञानम् अत्यल्पम् । तथापि प्रतापरुद्रः जयदेवं प्रशंसितवान् - 'महाज्ञानी भवान् मया सह स्पर्धितुं योग्यः' इति । एतस्य कारणं जयदेवस्य वेदान्तज्ञानं प्रतापरुद्रेण सम्यक् न अवगतम् इति वा? अपि च तयोर्मध्ये कः श्रेष्ठः इति मया न ज्ञातम् । विजेता कः? जयदेवः उत प्रतापरुद्रः? एतेषां सन्देहानां समाधानं जानन् अपि यदि भवान् न वदेत्, तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति ।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''स्पर्धी महाज्ञानी चेत् एव सः प्रतिस्पर्धिनः पाण्डित्यम् अवगन्तुं शक्नोति । सकलविद्यापारङ्गतः प्रतापरुद्रः जयदेवस्य वेदान्तज्ञानं सम्यक् एव अवगतवान् अस्ति इति तु वास्तविकः विषयः । अहम् एव श्रेष्ठः इति यदा चिन्तनं भवति, तदा एव तस्य पराजयः भवति । प्रतिस्पर्धिनः पाण्डित्यस्य ज्ञानस्य च अङ्गीकरणेन स्पर्धी जयं प्राप्नोति । प्रतापरुद्र-जयदेवयोः ज्ञानोदयस्य कारणीभूतः अंशः वेदान्तसारः । यः वेदान्तविचारं जानाति सः स्पर्धितुं न इच्छति । वेदान्ती आत्मना ज्ञातान् विषयान् सर्वेभ्यः वितरति । अज्ञातान् विचारान् बुधजनसकाशात् प्राप्नोति । एतं वास्तविकविचारं जयदेवः प्रथमं ज्ञातवान् । अतः जयदेवस्य एव जयः'' इति ।

एवं राज्ञः मौनभङ्गः यदा जातः, तदा शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा यथापूर्वं वृक्षस्य शाखाम् अवलम्बितवान् ।








# अपूर्वः दर्पणः

साहसकार्यकरणम् एव स्वस्य जीवनस्य लक्ष्यं मन्यमानः त्रिविक्रमः पुनरपि वृक्षस्य समीपं गतवान् । शाखायां लम्बमानं शवं स्कन्धे आरोप्य मौनं श्मशानाभिमुखं प्रस्थितवान् च । तदा शवान्तर्गतः वेतालः अवदत् -''अये राजन् ! भवान् कस्य अपूर्ववस्तुनः निमित्तं मध्यरात्रसमये अस्मिन् श्मशाने महान्तं परिश्रमं वहन् अस्ति इति न ज्ञायते मया । अपूर्वाणि वस्तूनि अपि कदाचित् शक्तिरहितानि भवन्ति इत्यस्य निदर्शनार्थं कस्यचित् राजकुमारस्य कथां श्रावयामि, यश्च अपूर्वं दर्पणं प्राप्य अपि तस्मात् प्रयोजनप्राप्तौ विफलः जातः। श्रद्धया तां कथां शृणोतु तावत्, येन भवतः मार्गायासः परिहृतः स्यात्'' इति ।

अनन्तरं वेतालेन कथा आरब्धा -

पूर्वं गजेन्द्रनामकः कश्चित् मुनिवर्यः पर्वतप्रदेशे निवसति स्म । सकल-

## वेतालकथा



शास्त्रपारङ्गतस्य तस्य आश्रमे बहवः युवकाः शिष्यत्वेन स्थितवन्तः आसन् ।

तस्य शिष्येषु सिंहपुरस्य राजकुमारः शिवदत्तः अपि अन्यतमः। शिवदत्तः चतुर्भ्यः वर्षेभ्यः गजेन्द्रस्य आश्रमे वसन् सर्वाः विद्याः अभ्यस्तवान् । विद्याभ्यास-समाप्तेः अनन्तरं शिष्याणां प्रतिगमनसमयः सन्निहितः । तेषां गमनसमये गुरुः गजेन्द्रः स्वशिष्याणां योग्यतानुगुणं किमपि वस्तु उपायनरूपेण ददाति स्म । शिवदत्तस्य प्रस्थानसमये गजेन्द्रः वात्सल्येन तस्य शिरः आमृशन् -''वत्स! इदानीं भवतः विद्याभ्यासः पूर्णः जातः अस्ति । सिंहपुरस्य युवराजाय भवते अहम् अपूर्वम् उपायनमेकं दास्यामि'' इति वदन् स्वस्य प्रसेवात् गोलाकारकं दन्तनिर्मितं दर्पणं निष्कास्य शिवदत्ताय दत्त्वा उक्तवान् - ''एषः अपूर्वः दर्पणः। यः एतस्य पुरतः तिष्ठति, तद्विषये विवरणं वदति एषः। भवान् एतस्मात् दर्पणात् स्वकार्ये प्रयोजनं प्राप्नोतु । अपि च 'दक्षः राजा' इति कीर्तिं सम्पादयतु । यदा एतस्य दर्पणस्य आवश्यकता नास्ति इति भवान् चिन्तयिष्यति, तदा एतं मह्यं प्रत्यर्पयतु'' इति ।

राजकुमारः शिवदत्तः गुरुणा दत्तं दर्पणं स्वीकृत्य तस्मै कृतज्ञताः समर्प्य ततः सिंहपुरं गतवान् । कांश्चन मासान् यावत् सुखेन कालयापनं कृतवान् च । केषाञ्चित् मासानाम् अनन्तरं सः पितुः इच्छानुसारं सिंहासनम् आरूढवान् ।

कदाचित् सिंहलदेशतः वीरभूपति-नामकः मल्लयोधः, धीरसिंहनामकः खड्ग-विद्यानिपुणः, भूपालसिंहनामकः धनुर्विद्यानिपुणः च सिंहपुरम् आगतवन्तः । ते राज्ञः शिवदत्तस्य दर्शनं प्राप्य प्रार्थितवन्तः - ''महाराज ! अस्मासु त्रिषु कः शक्तिमान् इति वक्तुं कोऽपि न शक्तः । 'भवतः सकाशे अपूर्वः दर्पणः अस्ति । तस्य दर्पणस्य साहाय्येन भवान् क्लिष्टाः अपि समस्याः परिहरिष्यति' इति ज्ञात्वा वयम् अत्र आगताः स्मः । अस्मासु कः बलवान् इति कृपया वदतु भवान्'' इति ।

युद्धविद्याः आयोज्य तेषां त्रयाणाम्

अपि अपूर्वं नैपुण्यं प्रत्यक्षं दृष्टवान् शिवदत्तः । अनन्तरं सः तान् त्रीन् अपि दर्पणस्य पुरतः स्थापयित्वा दर्पणम् उद्दिश्य उक्तवान् - ''एतेषु त्रिषु शूरतमः कः इति वदतु भवान्'' इति ।

किन्तु दर्पणतः किमपि उत्तरं न आगतम् । एतस्मात् शिवदत्तः नितरां चकितः अभवत् । 'अपूर्वः दर्पणः अपि अस्माकं समस्यां परिहर्तुम् अशक्तः' इति चिन्तया एव ते त्रयः अपि ततः निर्गताः।


कानिचन दिनानि अतीतानि । कोसलदेशतः सोमसुन्दरः विजयदेवः च शिवदत्तस्य समीपम् आगतवन्तौ । तौ उभौ अपि मल्लयुद्धनिपुणौ आस्ताम् । तयोः कः निपुणतरः इति समस्या । यतः मल्लयुद्धस्पर्धायां ताभ्यां बहुवारं भागः ऊढः आसीत् । सर्वदा उभौ अपि समान-शक्तिमन्तौ इत्येव निर्णयः जातः आसीत् ।

शिवदत्तः अपूर्वं दर्पणम् उद्दिश्य पृष्टवान् - ''हे दर्पण ! सोमसुन्दर-विजय-देवयोः शूरतरः कः?'' इति ।

अपरक्षणे एव दर्पणः उत्तरम् उक्तवान् - ''विजयदेवः'' इति ।

अपूर्वस्य दर्पणस्य सामर्थ्यं किञ्चिदपि न्यूनं न जातम् इति सन्तुष्टः शिवदत्तः पुनरपि दर्पणं पृष्टवान् - ''विजयदेवः कथं सोमसुन्दरात् शक्तिमान्?'' इति ।

तदा दर्पणेन उक्तम् - ''केनचित् मान्त्रिकेण दत्तं तायकं स्वभुजे बद्धवान् अस्ति सोमसुन्दरः । अतः सः सर्वविषयेषु




अपि जयं प्राप्नुवन् अस्ति'' इति ।

एतस्य वचनस्य श्रवणमात्रेण दर्पणस्य पुरतः स्थितवतः सोमसुन्दरस्य मुखं कान्तिहीनं जातम् । वस्तुस्थितेः ज्ञानात् कुपितः विजयदेवः सोमसुन्दरस्य भुजे बद्धं तायकं बलात् निष्कास्य क्षिप्तवान् ।

अनन्तरं तयोः मल्लयुद्धार्थं सर्वाः व्यवस्थाः कल्पितवान् शिवदत्तः । अपूर्वस्य दर्पणस्य वचनानि वास्तविकानि इति निरूपयन् इव विजयदेवः बलात् सोमसुन्दरं प्रताड्य अधः पातितवान् ।

रत्नपुरं वज्रपुरं च सिंहपुरस्य प्रतिवेशिराज्यद्वयम् । तत् राज्यद्वयं सिंहपुरस्य सामन्तराज्यम् अपि । रत्नपुरस्य राजकुमारी विजयमाधवी, वज्रपुरस्य



राजकुमारी चन्द्रकला च अप्रतिमसुन्दर्यौ इति श्रुतवान् आसीत् शिवदत्तः । सः तयोः उभयोः अपि भावचित्रम् आनाय्य दृष्टवान्। उभे अपि सौन्दर्येण समाने आस्ताम् । तयोर्मध्ये सुन्दरतरा का इति निर्णेतुम् अशक्तः शिवदत्तः तयोः मातापितृभ्यः वार्ता प्रेषितवान् यत् - पुत्र्या सह सिंहपुरम् आगच्छन्तु इति ।

अनन्तरदिने एव सामन्तराजौ उभौ अपि राजकुमारीभ्यां सह सिंहपुरम् आगतवन्तौ । शिवदत्तः अतिथिगृहे तेषां वसतिव्यवस्थां कल्पितवान् ।

कदाचित् सायङ्कालसमये शिवदत्तः सामन्तराजौ दृष्ट्वा उक्तवान् - ''मम आह्वानं पुरस्कृत्य भवन्तौ अत्र आगतवन्तौ इति यत् तेन अहं सन्तुष्टः अस्मि । भवतोः अत्र आह्वानस्य कारणम् एतावता एव भवद्भ्याम् ऊहितं स्यात् अपि । तथापि स्पष्टज्ञानार्थम् अहं वदिष्यामि । राजकुमार्योः विजयमाधवी-चन्द्रकलयोः भावचित्रदर्शनात् अपि सुन्दरतरा का इति निर्णेतुम् अशक्तः जातः अहम् । इदानीम् अहं विजयमाधवीं चन्द्रकलां च प्रत्यक्षं पश्यन् अस्मि । तथापि एतयोः का सुन्दरतरा इति अहं निर्णेतुं न शक्नोमि । अतः एतस्याः समस्यायाः परिहारम् अपूर्वदर्पणस्य साहाय्येन प्राप्तुं शक्नुमः वयम् । राजकुमार्यौ दर्पणस्य पुरतः तिष्ठतः चेत् सौन्दर्यवती का इति अपूर्वदर्पणः वदिष्यति'' इति ।

अनुक्षणं चन्द्रकला - ''अहं स्पधार्थं सिद्धा अस्मि'' इति वदन्ती गत्वा दर्पणस्य पुरतः स्थितवती । किन्तु विजयमाधवी मन्दहासं प्रकटय्य उक्तवती - ''युवराजः अन्धः इति इदानीं ज्ञातं मया । अन्धस्य परिणयापेक्षया अविवाहिततया स्थितिः एव श्रेयस्करी'' इति ।

क्षणं यावत् शिवदत्तः विजयमाधव्याः वचनात् कुपितः चेदपि अनन्तरं तस्याः कथनस्य भावम् अवगत्य मन्दहासपूर्वकं तस्याः पितरम् उक्तवान् - ''भवतः पुत्रीं विजयमाधवीम् अहम् ईष्टवान् अस्मि । यदि तस्याः अपि सम्मतिः अस्ति, तर्हि इदानीम् एव विवाहसन्नाहः भवतु'' इति ।

शिवदत्तस्य एतत् वचनं श्रुत्वा

विजयमाधव्याः मातापितरौ, तत्रत्याः राजोद्योगिनः च नितराम् आश्चर्यचकिताः ।

कानिचन दिनानि अतीतानि । शिवदत्त-विजयमाधव्योः विवाहः सवैभवं सम्पन्नः ।

मासः अतीतः । वीरभद्रनामकः राज-भवनस्य रक्षकः राज्ञ्या विजयमाधव्या आभरणपेटिकायाः उपरि स्थापितं चन्द्रहारं चोरयित्वा उद्यानस्थस्य अशोकवृक्षस्य कोटरे स्थापितवान् । 'हारस्य अदृश्यता-कारणात् राजभवने कोलाहलः भविष्यति एव । यदा कोलाहलः शान्तः भविष्यति, तदा हारं गृहं नेष्यामि' इति चिन्तितवान् आसीत् वीरभद्रः ।



किन्तु वीरभद्रेण वृक्षकोटरे हारस्थापनं मल्लिकानामिकया दास्या दृष्टम् आसीत् । वीरभद्रस्य निर्गमनानन्तरं मल्लिका तं हारं स्वीकृत्य गृहं गतवती ।

राज्ञी विजयमाधवी चन्द्रहारस्य अदर्शनविषयं पतिं निवेदितवती । अन्तःपुरस्य दासीषु कयाचित्, रक्षकभटेषु केनचित् वा हारः चोरितः स्यात् इति विचिन्त्य शिवदत्तः तान् सर्वान् आनीय अपूर्वदर्पणस्य पुरतः स्थापयित्वा दर्पणम् उक्तवान् - ''हे अपूर्वदर्पण ! चन्द्रहारस्य चोरः कः इति वदतु'' इति ।

भटाः दास्यः च एकैकशः अपूर्वदर्पणस्य अग्रभागतः अपरपार्श्वं गतवन्तः । दर्पणस्य पुरतः गमनसमये मल्लिका चातुर्येण वीरभद्रस्य पृष्ठतः स्थितवती । स्वस्य पर्यायः यदा आगतः तदा वीरभद्रस्य शरीरे भयात् कम्पनम् आरब्धम् । तावता दर्पणः उक्तवान् - ''वीरभद्रः चोरः'' इति ।

एतत् श्रुत्वा मल्लिका उरसि हस्तं स्थापयित्वा - ''हाँ, रक्षिता अहम्'' इति मन्दस्वरेण स्वगतम् उक्तवती । एतत् अकस्मात् राज्ञ्या विजयमाधव्या दृष्टम् । सा तत्क्षणं भटान् आज्ञप्तवती यत् मल्लिकायाः बन्धनं कुर्वन्तु इति ।

एतस्मात् आश्चर्यचकितः शिवदत्तः - ''माधवि ! किमिदम् ? हारस्य चोरः वीरभद्रः इति दर्पणेन एव उक्तं खलु ! एवं सति निरपराधिन्याः मल्लिकायाः बन्धनं किमर्थम् ?'' इति पृष्टवान् ।



"अत्र मल्लिका अपि सहभागिनी इति मम सन्देहः" इति उक्तवती विजयमाधवी ।

तदा शिवदत्तः तर्जनस्वरेण मल्लिकाम् उद्दिश्य - "कोऽपि अपराधी सुलभतया अस्मान् वञ्चयितुं न शक्नोति । वस्तुतः किं प्रवृत्तम् इति वदतु भवती" इति उक्तवान् ।

एतस्मात् भीता मल्लिका शिवदत्तस्य पादयोः पतित्वा प्रवृत्तं सर्वं निवेदितवती, गृहतः हारम् आनीय शिवदत्ताय दत्तवती च । शिवदत्तः चन्द्रहारं विजयमाधव्याः कण्ठे स्थापयित्वा तस्याः चातुर्यम् अभिनन्दितवान् ।

अनन्तरं शिवदत्तः पत्नीम् उद्दिश्य - "एतस्मात् अपूर्वदर्पणात् लाभः यथा, तथा हानिः अपि अस्ति । एतस्य प्रयोजनं सीमितम् इति इदानीं प्रमाणितम् अभवत् । अतः एतं दर्पणम् अद्य एव मम गुरवे प्रत्यर्पयिष्यामि" इति उक्तवान् ।

वेतालः एवं कथां समाप्य अवदत् - "अये राजन् ! मुनिवर्येण गजेन्द्रेण शिवदत्ताय यः दर्पणः दत्तः, सः केषुचित् सन्दर्भेषु समाधानकरम् उत्तरं न दत्तवान् । एतस्मात् दर्पणस्य सामर्थ्यविषये सन्देहः उत्पद्यते । त्रिषु वीरेषु शूरतमः कः इति कथने विफलः जातः दर्पणः । किन्तु मल्लयोधयोः सोमसुन्दर-विजयदेवयोः विषये समाधानकरं निर्णयम् उक्तवतः दर्पणस्य स्वभावः विचित्रः इव भासते । राजकुमार्योः सौन्दर्यनिर्णयसन्दर्भे विजयमाधवी दर्पणस्य पुरतः स्थातुं किमर्थं न इष्टवती इति तु न ज्ञायते । 'राजकुमार्या चन्द्रकलया सह स्पर्धायां जयं प्राप्तुं न शक्नोमि' इति विजयमाधव्याः चिन्तनं स्यात् वा ? तदास्तां तावत् । सर्वाङ्गसुन्दरः मन्मथसदृशः शिवदत्तः न विकलाङ्गः । एवं सत्यपि 'सः अन्धः' इति तस्य उपहासं कुर्वत्या विजयमाधव्या यत् उक्तं तत् अविवेकिनां लक्षणं खलु ! उपहासं कृतवतीम् अपि तां शिवदत्तः मनसा इष्टवान् । एषः मूर्खतायाः परमावधिः खलु ! अपूर्वदर्पणात् लाभः हानिः चेति उभयम् अपि सम्भवति इति किमर्थं चिन्तितं शिवदत्तेन ? अपूर्वस्य अपि दर्पणस्य गुरवे प्रतिदानम् अविवेकिनां

लक्षणं खलु ! एतेषां सन्देहानां समाधानं जानन् अपि यदि भवान् न वदेत्, तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति ।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''दर्पणः अपूर्वः महिमयुतः च इत्यत्र नास्ति सन्देहः । किन्तु तस्यापि काचित् सीमा अस्ति इत्यपि वास्तविकः अंशः एव । सिंहलदेशतः आगताः वीरभूपतिः, धीरसिंहः, भूपालसिंहः च शौर्ये साहसे च समानाः इत्यत्र नास्ति सन्देहः । अतः एव तेषां मध्ये स्पर्धा न युज्यते । एतस्मात् कारणात् एव दर्पणः त्रिषु शूरतमं न सूचितवान्, अपि तु मौनं आश्रितवान् । किन्तु सोमसुन्दर-विजयदेवयोः विषये निर्णयं श्रावयितुं शक्तः जातः दर्पणः । राजकुमारी विजयमाधवी सौन्दर्यनिर्णयार्थं दर्पणस्य पुरतः स्थितिं निराकृतवती इति यत्, तत् पराजयभीत्या न । पुरतः स्थितवत्योः राजकुमार्योः सौन्दर्यनिर्णयं शिवदत्तः स्वयं कर्तुं न शक्तवान्, अपि तु तत् दायित्वं दर्पणे आरोपितवान् । एतस्मात् विजयमाधवी कुपिता । अतः एव सा 'शिवदत्तः अन्धः' इति उक्तवती । तस्याः वचनस्य भावम् अवगत्य एव शिवदत्तः तां परिणीतवान् । अपूर्वदर्पणस्य शक्तिः परिमिता अस्ति इति विषयं ज्ञात्वा मल्लिका चौर्यं कृत्वा अपि आत्मानं रक्षितुम् इष्टवती । किन्तु विजयमाधव्याः सूक्ष्म-परिशीलनेन चातुर्येण च प्रमाणितः अभवत् यत् मल्लिका एव चौर्यं कृतवती इति । एतां घटनां परिलक्ष्य शिवदत्तः चिन्तितवान् यत् अपूर्वदर्पणस्य वचनात् कदाचित् सत्यस्थितिः अपि न ज्ञायते इति । अपूर्वस्य साधनस्य अपेक्षया बुद्धिशक्तेः उपयोगेन समस्यापरिहारः एव वरम् इति विचिन्त्य शिवदत्तः निश्चितवान् यत् गजेन्द्राय दर्पणः प्रतिदातव्यः इति । शिवदत्तस्य निर्णयः सन्दर्भोचितः अस्ति'' इति ।

एवं वदतः राज्ञः मौनभङ्गः यदा जातः, तदा शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा वृक्षस्य शाखाम् अवलम्बितवान् ।





# वचनभङ्गः

'मया एतावता बहवः उपायाः आश्रिताः । तथापि एषः धूर्तः वेतालः कथमपि मां पराजितं कुर्वन् एव अस्ति । एवं तर्हि एतस्य वशीकरणार्थं कं वा उपायं कुर्याम् ?' इति चिन्तयन् दृढव्रतः त्रिविक्रमः पुनश्च वृक्षस्य समीपं गत्वा वृक्षे स्थितं शवं स्कन्धे आरोप्य श्मशानाभिमुखं प्रस्थितवान् । तदा शवान्तर्गतः वेतालः अवदत् – ''हे राजन् ! भवान् कस्मैचित् किञ्चन वाग्दानं कृतवान् अस्ति इति मम भाति । तस्य वाग्दानस्य पूरणार्थम् एव कष्टानि सहमानः इव दृश्यते भवान् । यदि मया ऊहितं समीचीनं स्यात् तर्हि मम प्रश्नः यत् भवान् अन्तिमक्षणं यावत् वचनभङ्गं विना स्थातुं शक्नोति वा ? इति । अत्यन्तं प्रज्ञावन्तः सन्मार्गिणः मानवाः अपि कदाचित् स्वार्थप्रेरिताः सन्तः कृतं वाग्दानं स्वयं विस्मरन्ति । कीर्तिमती इति काचित् विद्यावती महाराज्ञी चन्द्रमुखीनामिकायै

## वेतालकथा



गन्धर्वकन्यकायै कृतं वाग्दानं कथम् उल्लङ्घितवती इति निरूपयितुम् एकां कथां वदामि । तस्य श्रवणतः भवतः मार्गायासः अपि परिहृतः भवेत् । श्रद्धया श्रृणोतु तावत्'' इति ।

अनन्तरं वेतालः कथाम् आरब्धवान् -

पूर्वं चन्द्रदेवः चोलदेशस्य राजा आसीत् । तस्य प्रतिवेशिराज्यस्य राजकुमारी कीर्तिमती । सा चन्द्रदेवस्य मातुः दूरबन्धुः एव । यदा कीर्तिमती बालिका आसीत् तदा एव चन्द्रदेवस्य माता 'कीर्तिमतीं स्नुषात्वेन स्वीकरिष्यामि' इति कीर्तिमत्याः पित्रे वाग्दानं कृतवती आसीत् । तदारभ्य कीर्तिमती तत्रैव आसीत् । चन्द्रदेवस्य माता ताम् अत्यन्तं प्रीत्या पालयन्ती आसीत् ।

एवं बाल्यादारभ्य सहैव वर्धितवन्तौ इति कारणतः यथा यथा तौ प्रवृद्धौ तथा तथा कीर्तिमती-चन्द्रदेवयोः मध्ये स्नेहः अपि प्रवृद्धः । यदा गृहे तयोः विवाहविषये चिन्तनम् आरब्धं तदा कीर्तिमती किञ्चिदिव खिन्ना । यतः तयोः रूपे स्पष्टः भेदः आसीत् । चन्द्रदेवस्य रूपं सुन्दरं मोहकं च आसीत् । किन्तु कीर्तिमती न अपूर्वरूपवती ।

स्फुरद्रूपी चन्द्रदेवः कीर्तिमतीं परिणयति इति ज्ञात्वा कीर्तिमत्याः सख्यः 'मातुः वाग्दानस्य पूरणार्थं चन्द्रदेवः इदानीं कीर्तिमतीं परिणयेत् । किन्तु अग्रे काञ्चित् गन्धर्वकन्याम् एव परिणयेत् सः' इति रहसि परस्परं वार्तालापं कुर्वत्यः आसन् ।

तदा तदा एतादृशं सम्भाषणं कीर्तिमत्याः कर्णपथम् अपि आगच्छति स्म । एतस्मात् नितरां खिन्ना सा कदाचित् चन्द्रदेवम् उद्दिश्य - ''अहं भवतः अनुरूपा वधूः नास्मि । अतः भवान् अनुरूपां काञ्चित् सौन्दर्यवतीं परिणयतु'' इति प्रार्थितवती ।

तदा चन्द्रदेवः मन्दहासपूर्वकं - ''कीर्तिमति ! विवेकरहिताः केचन मूर्खाः आवयोः विषये असम्बद्धं प्रलपन्ति । तत् भवती श्रुतवती इति भाति । कालः एव यथायोग्यं निर्णयं करिष्यति'' इति उक्तवान् ।

चन्द्रदेवस्य एतैः निष्कल्मषवचनैः कीर्तिमत्याः सङ्कोचः अपगतः । अग्रे सा




चन्द्रदेवं परिणीय सन्तोषेण आसीत् । वर्षाणि अतीतानि । किन्तु कीर्तिमत्याः अपत्यं न अभवत् । अतः कीर्तिमती मनसि एव खेदम् अनुभवन्ती आसीत् ।

अथ कदाचित् सुन्दर्यां पूर्णिमायां रात्रौ चन्द्रदेवः कीर्तिमत्या सह नदीतीरे विहरन् आसीत् । तस्मिन् एव क्षणे आकाशमार्गेण गच्छन्ती चन्द्रमुखीनामिका काचित् गन्धर्वकन्या तौ दृष्टवती ।

चन्द्रमुखी गन्धर्वराजस्य विद्युन्मयस्य पुत्री । परमसुन्दरी इति ख्यातिं प्राप्तवती आसीत् सा । गन्धर्वेषु कोऽपि सुन्दरः नास्ति इति तस्याः मनसि असमाधानम् आसीत् । चन्द्रदेवस्य सौन्दर्येण आकृष्टा अभवत् चन्द्रमुखी । तत्क्षणे एव अदृश्यरूपेण तौ अनुसृतवती सा । सन्तानं नास्ति इति दुःखेन स्तः तौ इति अपि सा ज्ञातवती ।


तदा मौनं ततः निर्गता चन्द्रमुखी पुनः कदाचित् एकाकितया वृन्दावने विहरतः चन्द्रदेवस्य पुरतः प्रत्यक्षीभूय स्वस्य विषये विवरणं वदन्ती, 'मां वृणोतु' इति प्रार्थितवती ।

अनूह्याम् एतां घटनां दृष्ट्वा चकितः चन्द्रदेवः विनयपूर्वकं चन्द्रमुख्याः अपेक्षां निराकृतवान् । तथापि चन्द्रमुखी निरुत्साहं न प्राप्तवती ।

एकान्ते कदाचित् सा कीर्तिमत्या मिलित्वा चन्द्रदेवेन कृतं निराकरणं विवृत्य - ''चन्द्रदेवः भवत्याम् अतिशयेन अनुरागवान् अस्ति । अतः एव तस्य अनुरूपां सौन्दर्यवतीं माम् अपि तिरस्कृतवान् अस्ति सः । मया तु स्वयं प्रार्थना कृता आसीत् । भवतीं सर्वस्वं मन्यते चन्द्रदेवः । सौन्दर्यस्य विषयः दूरे तिष्ठतु नाम । किन्तु भवत्याः अनपत्यतायाः कारणतः सः अपि महान्तम् खेदम् अनुभवन् अस्ति । किम् एतत् उचितम् ? भवती एव चिन्तयतु'' इति उक्तवती ।

चन्द्रमुख्याः वचनैः जातं खेदम् अप्रकटयन्ती कीर्तिमती - ''भवतु । अत्र भवत्याः आगमनस्य उद्देशः कः इति एतावता अपि न अवगतं मया'' इति उक्तवती ।

तदा चन्द्रमुखी - ''सर्वं विवृणोमि ।



शृणोतु तावत् । यदि भवती पत्युः आनन्दम् अपेक्षमाणा निःस्वार्थिनी पत्नी अस्ति, तर्हि चन्द्रदेवस्य अङ्गीकारं प्राप्य तेन सह मम विवाहं निर्वर्तयतु । वर्षाभ्यन्तरे जनिष्यमाणेन पुत्रेण सह क्रीडिष्यन् आनन्देन कालं यापयेत् सः । अपत्यप्राप्त्या भवती अपि सन्तोषं प्राप्नुयात् एव । मम परिणयात् अपि भवतीं न विस्मरिष्यति सः । प्रत्युत भवत्याः निःस्वार्थबुद्धिं ज्ञात्वा भवत्याः विषये अधिकं गौरवं प्राप्य श्लाघमानः स्थास्यति । अतः सम्यक् चिन्तयतु'' इति उक्तवती ।

कीर्तिमती बहुकालं यावत् मौनं चिन्तयन्ती आसीत् । अन्ते चन्द्रमुखीम् उद्दिश्य - ''किन्तु मम एकः नियमः अस्ति'' इति उक्तवती ।

''किं तत् ?'' इति आश्चर्येण पृष्टवती चन्द्रमुखी ।

''अद्य चैत्रकृष्णपञ्चमी । अद्य आरभ्य एकं वर्षं यावत् समयावकाशं ददातु । तावति काले अपि अहं मातृत्वं न प्राप्स्यामि चेत् चन्द्रदेवः भवतीम् एव यथा वृणुयात् तथा प्रयत्नं करिष्यामि'' इति वाग्दानं कृतवती कीर्तिमती ।

''अस्तु, तथैव भवतु'' इति उक्त्वा ततः निर्गतवती चन्द्रमुखी ।

कदाचित् देवदर्शनं कृत्वा मन्दिरतः प्रत्यागच्छन्ती आसीत् कीर्तिमती । मन्दिरस्य कस्मिंश्चित् कोणे कश्चन वृद्धः संन्यासी उपविष्टवान् आसीत् । सः कीर्तिमतीं हस्तसंज्ञया स्वसमीपम् आहूतवान् । कीर्तिमती संन्यासिनः समीपं गत्वा श्रद्धया तं नमस्कृतवती ।

संन्यासी हसन् आशीर्वादं कृत्वा - ''सन्तानः नास्ति इति निरन्तरं महत् दुःखम् अनुभवन्ती अस्ति वा अम्ब ?'' इति पृष्टवान् ।

कीर्तिमती अङ्गीकारपूर्वकं शिरः चालितवती ।

''कृपया भवत्याः हस्तं प्रदर्शयतु तावत्'' इति उक्त्वा कीर्तिमत्याः वामहस्तं परिशीलितवान् संन्यासी ।

हस्ते विद्यमानाः रेखाः परिशील्य सः खेदमिश्रितेन स्वरेण - ''भवत्याः हस्ते सन्तानप्राप्त्यर्थं रेखाः एव न सन्ति'' इति

उक्तवान् ।

पुनः क्षणं यावत् आलोच्य सः - "किन्तु सन्तानः नास्ति चेदपि उज्ज्वलभविष्यतः चिह्नानि स्फुटं दृश्यन्ते । अतः एकं कार्यं कर्तुं शक्नोति वा भवती ?" इति पृष्टवान् ।

"वदतु स्वामिन्" इति आनन्देन उक्तवती कीर्तिमती ।

"एतस्य राज्यस्य उत्तरदिशि विन्ध्यपर्वतावली अस्ति इति भवत्या ज्ञातम् एव अस्ति । पर्वतानां मध्यभागे एकं खातम् अस्ति । तेन मार्गेण अपरं तीरं प्राप्नोति चेत् वैकुण्ठेश्वरमहर्षेः आश्रमः अस्ति । भवती पत्या सह चैत्रमासस्य शुक्लपक्षस्य प्रथमायां तिथौ सूर्योदयात् पूर्वं तत्र उपस्थिता भवतु । शरद्दषेः कथनानुसारम् आवाम् अत्र आगतवन्तौ स्वः इति भवती वैकुण्ठेश्वरमहर्षिं वदतु । अग्रे किं करणीयम् इति सः एव विस्तरेण भवतीं सूचयिष्यति" इति उक्तवान् ।

संन्यासिनः वचनैः पुनश्च चैतन्यं प्राप्य कीर्तिमती - "तथैव भवतु स्वामिन् । निश्चयेन तत्र गमिष्यावः" इति उक्त्वा संन्यासिनं नमस्कृत्य ततः राजगृहं प्रत्यागतवती ।


तस्मिन् दिने रात्रौ पत्युः समीपे उपविश्य सर्वमपि विस्तरेण विवृत्य - "आवयोः भाग्यस्य परीक्षणार्थम् एषः एकः एव अवसरः अवशिष्टः अस्ति । तस्मिन् संन्यासिनि मम प्रबलः विश्वासः अस्ति



अपि । अतः कृपया भवान् अपि मया सह किञ्चित् परिश्रमं यदि कुर्यात् ..." इति उक्त्वा मौनम् आश्रितवती ।

पत्न्याः उद्वेगं ज्ञात्वा चन्द्रदेवः - "भद्रे ! पतिपत्न्यौ आवां सुखेन सह दुःखं, सौख्येन सह श्रमं च विभज्य स्वीकुर्वः चेत् एव जीवनं सुखमयं भवति । अपेक्षा केवलं भवत्याः न, अपि तु आवयोः । अतः द्वौ अपि गमिष्यावः । कष्टं भवतु नाम" इति उक्तवान् ।

संन्यासिनः वचनानुसारं कीर्तिमती-चन्द्रदेवौ प्रस्थाय चैत्रमासस्य शुक्लपक्षस्य प्रथमायां तिथौ सूर्योदयात् पूर्वम् एव वैकुण्ठेश्वराश्रमं प्राप्तवन्तौ । वृद्धः करुणामयः सः ऋषिः तौ आदरपूर्वकं



स्वागतीकृत्य आहारपानीयादिदानेन तौ सत्कृत्य कुशलप्रश्नान् पृष्टवान् । तदा चन्द्रदेवः मन्दिरे स्थितेन संन्यासिना उक्तं सर्वं निवेद्य सन्तानापेक्षां प्रकटितवान् ।

सर्वं श्रद्धया श्रुत्वा वैकुण्ठेश्वरः - ''चन्द्रदेवमहाराज ! 'कृपया भवतः दक्षिणहस्तं दर्शयतु' इति उक्तवान् । किञ्चित्कालं हस्तं परिशील्य सः ऋषिः - ''भवतः हस्ते अपि सन्तानरेखाः न सन्ति राजन्, किन्तु शरद्दषेः कथनानुसारं चमत्कारः कोऽपि भवेत् एव'' इति उक्तवान् ।

''चमत्कारः वा ? तत् कथम् ?'' इति आश्चर्येण पृष्टवान् चन्द्रदेवः ।

तदा वैकुण्ठेश्वरमहर्षिः - ''आम्, चमत्कारः एव । कथम् इति विवृणोमि । इतः त्रियोजनपरिमिते दूरे अतिप्राचीनः कश्चन शिवालयः अस्ति । तत्रैव कश्चन प्राचीनः आम्रवृक्षः अपि अस्ति । सः वृक्षः वर्षे सकृत् एकं फलं ददाति । अपेक्षावान् यः कोऽपि आत्मशुद्ध्या प्रार्थयन् यदि वृक्षस्य अधः तिष्ठति तर्हि सः तत् फलं प्राप्नोति । किन्तु अपेक्षा न्यायपरा एव भवेत् । नो चेत् तत् फलं भूमौ पतति । अधः पतितं फलं खादति चेत् अपि प्रयोजनं नास्ति । तत् अञ्जलौ पतति चेत् एव अपेक्षा पूर्णा भवति । रात्रौ चन्द्रोदयसमये तत्र गत्वा स्वभाग्यस्य परीक्षां कुरुताम्'' इति विवृतवान् ।

महर्षेः वचनं श्रुत्वा कीर्तिमती त्वरया - ''अहम् अन्यत् किमपि न इच्छामि स्वामिन् । विवाहितस्त्रिया सत्या मया सन्तानापेक्षाकरणं न्यायपरं न वा ?'' इति पृष्टवती ।

महर्षिः तस्याः वचनं श्रुत्वा मन्दहासपूर्वकं - ''अम्ब, अहं किम् उत्तरं ददामि ? धर्मशास्त्रस्य विचारः अत्यन्तं सूक्ष्मः । तस्य गभीरतां देवः एव जानाति'' इति उक्तवान् ।

अनन्तरं महर्षेः वचनानुसारं कीर्तिमती-चन्द्रदेवौ प्रयाणं कृत्वा चन्द्रोदयात् पूर्वं शिवालयं प्राप्तवन्तौ । वृक्षे सुवर्णकान्त्या प्रकाशमानं फलं दृष्ट्वा कीर्तिमती श्रद्धापूर्वकं वृक्षं नमस्कृत्य वृक्षस्य अधः अञ्जलिं प्रसार्य स्थितवती । आश्चर्यं नाम चन्द्रदेवः अपि

अञ्जलिं प्रसार्य ततः किञ्चिद्दूरे स्थितवान् आसीत् ।

चन्द्रोदयः अभवत् । वृक्षे विद्यमानं फलम् अधः अवतरत् साक्षात् चन्द्रदेवस्य अञ्जल्यां पतितम् ।

अनिरीक्षिताम् एतां घटनां दृष्ट्वा चकिता कीर्तिमती क्षणं यावत् विचिन्त्य चन्द्रदेवेन दत्तं फलस्य अर्धभागं सहर्षं स्वीकृतवती । ततः द्वाभ्याम् अपि तत् फलं खादितम् ।

तावत्पर्यन्तं मौनं स्थितवती कीर्तिमती - ''प्रभो, भवतः अपेक्षा का इति ज्ञातुं शक्नोमि वा ?'' इति पृष्टवती ।

तदा चन्द्रदेवः किञ्चिदिव गाम्भीर्येण - ''कीर्तिमति ! विद्यावती विवेकिनी च भवती मम वचनानि अवगन्तुं शक्नोति इति विश्वसिमि । एतस्य पवित्रस्य वृक्षस्य समीपे क्रियमाणा प्रार्थना न्यायपरा स्यात् इति यत् महर्षिणा उक्तं तत् स्मरति खलु भवती ? सन्तानं नास्ति इत्येषः विषयः अस्माकं जीवने लोपरूपेण स्यात् । किन्तु एषः विषयः प्रकृत्याः दृष्ट्या वैपरीत्यं वा अधर्मः वा न । प्रकृतिनियमाः न उल्लङ्घनीयाः इत्यत्र गौरवं प्रदर्शयन्तः वयं विधिलिखिते परिवर्तनम् अपेक्षामहे चेत् किं तत् उचितं भवेत् ? तादृशी अपेक्षा पूर्णा भवेत् वा ? एवं सन्देहं प्राप्तवान् अस्मि । दरिद्रः कश्चित् चौर्यं कृत्वा धनं सम्पादयति । अग्निसाक्षिपूर्वकं काञ्चित् परिणीय तां तिरस्कृत्य अन्यां परिणयति । एवं चेत् तस्य व्यवहारः धर्मविरुद्धः न भवेत् वा ? एवं



मम मनसि विविधाः सन्देहाः सन्ति । अतः एव किमपि निर्णेतुम् अशक्नुवन् अहं पवित्रवृक्षम् उद्दिश्य - 'हे धर्मदेव, अग्निसाक्षितया परिणीतवन्तौ आवां यावज्जीवम् आनन्देन जीवनं यथा कुर्याव तथा आशीर्वादं करोतु' इति प्रार्थितवान्'' इति उक्तवान् ।

पत्युः वचनं श्रुत्वा दिङ्मूढा कीर्तिमती - ''सन्तानं नास्ति चेदपि चिन्ता नास्ति । गुणवान् पतिः तु अस्ति'' इति हृष्टा । ततः प्रस्थाय अनन्तरदिने तौ राजधानीं प्रत्यागतवन्तौ ।

केषाञ्चित् दिनानाम् अनन्तरं चैत्र-कृष्णपञ्चम्यां तिथौ चन्द्रमुखी आगत्य कीर्तिमत्या मिलितवती । तदा कीर्तिमती

ताम् आदरेण स्वागतीकृत्य सत्कृतवती । अनन्तरं - "चन्द्रमुखि, वाग्दानम् उल्लङ्घयन्तीं मां क्षाम्यतु कृपया । मम पतिः एकपत्नीव्रतस्थः" इति उक्तवती । प्रवृत्तं सर्वं निवेदितवती च ।

सर्वं श्रुत्वा चन्द्रमुखी - "कीर्तिमति, भाग्यशालिनी भवती शीघ्रमेव पुत्रवती भविष्यति" इति उक्त्वा ततः निर्गतवती ।

वैचित्र्यं नाम गच्छता कालेन कीर्तिमती सुन्दरस्य शिशोः कृते जन्म दत्तवती ।

वेतालः एवं कथां समाप्य अवदत् - "राजन् ! कीर्तिमती स्ववाग्दानम् उल्लङ्घितवती इति कारणात् स्वार्थपरा जाता । तथापि सन्तानभाग्यमेव तस्याः न आसीत् । तादृशी सा पुत्रवती अभवत् । किम् एतत् विचित्रं न ? एतस्य सन्देहस्य समाधानं जानन् अपि यदि न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्" इति ।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः - "कीर्तिमती स्वार्थ-प्रेरिता वाग्दानं न उल्लङ्घितवती । 'मम सन्तानभाग्यं नास्ति' इति भावनायाः उत्पत्तेः पूर्वम् एव चन्द्रदेवः धर्मसूक्ष्मम् उक्त्वा तस्याः सन्देहं निवारितवान् आसीत् । तया वाग्दानम् अनुसृतं चेत् चन्द्रदेवस्य कथनानुगुणं धर्मः उल्लङ्घितः इति भवति । चन्द्रदेवस्य प्रार्थनायाम् अपि द्वन्द्वार्थः अस्ति । एकः अर्थः - 'विधिलिखितं परिवर्त्य सन्तान-दानेन एव अनुगृह्य आनन्देन जीवनं यापयितुम् अवसरं कल्पयतु' इति । अपरः अर्थः - "सन्तानभाग्यं नास्ति चेदपि आनन्देन जीवितुम् आशीर्वादं करोतु' इति । एतस्यां प्रार्थनायां विद्यमानः गूढार्थः अनुपमः एव । अतः तयोः विधिलिखितं परिवर्तितम् अभवत् । सुन्दरं शिशुं दृष्ट्वा तौ सन्तोषम् अनुभूतवन्तौ । धर्माधर्मयोः विषये सूक्ष्मज्ञानम् आसीत् इति कारणतः एव चन्द्रदेवस्य प्रार्थनातः असाध्यम् अपि सिद्धम् अभवत्" इति उक्तवान् ।

एवं वदता राज्ञा यदा मौनभङ्गः कृतः तदा शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा पुनश्च वृक्षे लम्बमानः स्थितवान् ।





# कल्पनासुन्दरी

साहसकार्यकरणम् एव जीवनस्य लक्ष्य मन्यमानः त्रिविक्रमः पुनरपि वृक्षस्य समीपं गतवान् । वृक्षम् आरुह्य शाखायां लम्बमानं शवं स्कन्धे आरोप्य अधः आगतवान्, ततः मौनं श्मशानाभिमुखं प्रस्थितवान् च । तदा शवान्तर्गतः वेतालः अवदत् - ''अये राजन् ! अस्मिन् भयङ्करे अन्धकारे श्मशाने क्षुद्रजीविनः सञ्चरन्ति । एतादृशस्थले भवान् यत् कष्टम् अनुभवन् अस्ति तत् दृष्टवतः मम मनसि करुणा उत्पन्ना भवति । तेनैव सह कश्चन संशयः अपि उत्पद्यते । सः च - 'अस्मिन् जगति स्थितेषु मानवेषु सर्वरीत्या अत्युन्नतस्थितिं प्राप्तवान् अद्वितीयः स्थितप्रज्ञः स्यात् वा भवान्' इति । तत् आस्तां तावत् । अपूर्वः अलौकिकः अनुभवः कदाचित् मानवेषु दुःखं जनयति । उदाहरणार्थम् अहं देवसिंहनामकस्य युवकस्य कथां श्रावयामि । श्रद्धया शृणोतु तावत्'' इति ।




## वेतालकथा



अनन्तरं वेतालेन कथा आरब्धा -

पूर्वं कस्मिंश्चित् देशे देवशर्मा नाम कश्चित् युवकः आसीत् । सः राजवंशीयः सुन्दरः च आसीत् । विवाहवयः जातं चेदपि सः यां कामपि कन्यां न अङ्गीकरोति स्म । यतः तस्य मनसि कस्याश्चित् सुन्दर्याः कल्पना आसीत् । तादृश्याः सुन्दर्याः अन्वेषणं सः करोति स्म ।

हिमालयपर्वतप्रान्ते विद्यमानं सरोवरं स्नानार्थं काश्चित् गन्धर्वकन्याः आगच्छन्ति इति देवशर्मा श्रुतवान् आसीत् । मार्गमध्ये अरण्ये क्रूरप्राणिनः सन्ति इति कारणतः केऽपि तत्र न गच्छन्ति स्म । परन्तु देवशर्मा प्राणापायम् अपि अविगणय्य कल्पनासुन्दरीम् अन्विष्यन् सरोवरस्य समीपम् आगतवान् ।

तच्च सरोवरं कस्यचित् गन्धर्वराजस्य आसीत् । सरोवरं प्रति तस्य पुत्र्यः जलक्रीडार्थम् आगच्छन्ति स्म । तासु मनोरमानामिकां गन्धर्वकन्यां देवशर्मा दृष्टवान् । तस्याः दर्शनस्य अनुक्षणमेव देवशर्मा चिन्तितवान् यत् एषा एव मम कल्पनासुन्दरी इति । तस्याः समीपं गत्वा देवशर्मा स्वमनोभिलाषं वक्तुं यावत् उद्युक्तः अभवत्, तावता सा सरोवरे निमग्ना सती अदृश्या अभवत् ।

परन्तु देवशर्मा एतेन अल्पाम् अपि निराशाम् अप्राप्नुवन् सरोवरसमीपे एव स्थितवान् । एकमासानन्तरं मनोरमा पुनः तेन दृष्टा । इदानीं सः एकस्य वृक्षस्य पृष्ठतः निलीय तिष्ठन्, यदा सा समीपम् आगता तदा हठात् तस्याः हस्तं गृहीतवान् । परन्तु मनोरमा कथञ्चित् देवशर्मतः आत्मनः विमोचनं संसाध्य ततः सरोवरे अदृश्या अभवत् ।

यदा ताम् अनुसृत्य गतः देवशर्मा सरोवरस्य अन्तः गन्तुम् उद्युक्तः, तदा 'तिष्ठतु' इति गम्भीरस्वरः कश्चन श्रुतः । अनन्तरक्षणे गन्धर्वराजः तिसृभिः स्वपुत्रीभिः सह सरोवरात् बहिः आगतवान् । ताः तिस्रः अपि दर्शनेन समानरूपिण्यः आसन् । सः गन्धर्वराजः देवशर्माणम् उक्तवान् - "एताः तिस्रः अपि मम पुत्र्यः एव । एतासु यस्यां भवतः अनुरागः अस्ति तां यदि भवान् अभिज्ञातुं

शक्नुयात् तर्हि अहं तां भवते दास्यामि'' इति ।

देवशर्मा तिस्रः अपि तदेकदृष्ट्या वीक्षितवान् । 'एतासु तिसृषु पूर्वं का दृष्टा' इति तेन सर्वथा न अवगतम् । तावति काले तस्य मनसि कश्चन उपायः स्फुरितः । 'गुल्मान्तरितः अहम् एतासु कस्याश्चित् हस्तं गृहीतवान् आसम् । मम ग्रहणं दृढम् आसीत् । यद्यपि सा तदा मम ग्रहणात् आत्मानं विमोच्य गतवती, तथापि तस्याः हस्ते इदानीम् अपि ग्रहणसूचकं चिह्नं किमपि स्यात् एव । हस्ते तत् ग्रहणचिह्नम् अभिज्ञातं चेत् मदनुरागपात्रीभूता अभिज्ञाता भविष्यति' इति सः चिन्तितवान् । अतः सः एकैकस्याः अपि हस्तं परिशीलितवान् । तासु एकस्याः हस्तस्य चर्म किञ्चित् रक्तवर्णं सत् कान्तिहीनम् आसीत् । तदा देवशर्मा अनुरागपात्रभूतां ताम् अभिजानन् तां कन्यां गन्धर्वराजाय दर्शितवान् ।

तदा गन्धर्वराजः सन्तोषेण - ''भवान् सम्यक् मनोरमायाः अभिज्ञानं प्राप्तवान् । मनोरमायाः अपि भवान् प्रियः एव । अतः भवतोः विवाहः अनुमन्यते मया । परन्तु एकः नियमः यत् सर्वदा एतस्याः विषये भवान् शान्तः एव भवेत् । यदाकदाचित् अपि एतस्य नियमस्य भङ्गः न भवेत् । कदाचित् भवान् कोपं कृत्वा एतां त्रिवारं ताडयिष्यति चेत् एषा भवन्तं त्यक्त्वा गन्धर्वलोकम् आगमिष्यति । यावत् भवान् नियमं पालयिष्यति तावत् मनोरमा भवतः



समीपे स्थास्यति'' इति उक्त्वा मनोरमां तत्रैव त्यक्त्वा द्वाभ्यां पुत्रीभ्यां सह ततः अदृश्यः अभवत् ।

लज्जया शिरः अवनमय्य स्थितवतीं मनोरमां तत्रैव गान्धर्वविधिना परिणीय स्वनगरम् आनीतवान् देवशर्मा ।

केषाञ्चित् दिनानाम् अनन्तरं देवशर्मा स्वपत्न्या सह आत्मीयस्य मित्रस्य गृहं गतवान् । मित्रस्य पुत्रस्य नामकरणदिनम् आसीत् तत् । सर्वे बान्धवाः तत्र आगताः आसन् । देवशर्मा आत्मना आनीतम् उपायनं शिशवे दत्तवान् । ततः सः शिशुम् उन्नीय पत्न्यै दातुम् उद्युक्तः । तदा मनोरमा शिशुम् उपेक्षया पश्यन्ती वेगेन ततः निर्गतवती । तत्रत्याः सर्वे जनाः देवशर्मा च




तस्याः एतं व्यवहारं दृष्ट्वा नितराम् आश्चर्यचकिताः ।

गृहं प्रति आगमनानन्तरं देवशर्मा कोपेन पत्नीं पृष्टवान् - "मम मित्रस्य गृहे भवती शिशुं दृष्ट्वा किमर्थं तथा कृतवती ?" इति ।

"तं शिशुम् उन्नेतुम् अहं न इष्टवती" इति उक्तवती मनोरमा ।

तदा देवशर्मा पृष्टवान् - "तदेव अहं पृच्छन् अस्मि - किमर्थं तथा कृतवती इति ?" इति ।

"कारणं तु न वदामि" इति उक्तवती मनोरमा । अनुक्षणमेव देवशर्मा तां कपोले ताडितवान् । तदा मनोरमायाः नेत्राभ्याम् अश्रूणि पतितानि ।

रुदती एव सा पतिं देवशर्माणम् उक्तवती - "तं शिशुं दृष्ट्वा अहं ज्ञातवती यत् सः शिशुः यदा ज्येष्ठः भविष्यति तदा बहुजनानां हननं करिष्यति इति । तादृशम् अहं स्प्रष्टुं न इष्टवती । अतः भवान् कोपेन मां ताडितवान् । एतत् प्रथमं ताडनम्" इति ।

देवशर्मा स्वदोषं ज्ञातवान् । इतःपरं जागरूकतया व्यवहरणीयम् इति सः निश्चितवान् । तदनुगुणम् एव व्यवहारम् आरब्धवान् च ।

एतस्याः घटनायाः मासात् अनन्तरं नगरपालकस्य पुत्र्याः विवाहनिमित्तं देवशर्मा मनोरमा च गतवन्तौ । नगरपालकः तौ द्वौ अपि आदराभिमानेन आहूय कल्याणमण्डपसमीपं नीतवान् । यदा वरः वध्वाः कण्ठे माङ्गल्यसूत्रं बन्धुम् उद्युक्तः तदा मनोरमा उच्चध्वनिना रोदनम् आरब्धवती । तत्र सम्मिलिताः सर्वे जनाः तां कुतूहलेन दृष्टवन्तः ।

तदा देवशर्मा लज्जाम् अनुभवन् मृदुस्वरेण पत्नीं पृष्टवान् - "किमर्थं रोदनं करोति भवती ?" इति ।

"किं वदामि ? तौ वधूवरौ वैरिणौ । विवाहानन्तरं तौ मिलित्वा न जीविष्यतः । सर्वदा कलहं करिष्यतः । एतयोः जीवनं यातनामयं भविष्यति" इति उक्त्वा मनोरमा रोदनम् अवरोद्धुं प्रयत्नं कृतवती ।

तस्याः वचनं श्रुतवान् कश्चित् पार्श्वे विद्यमानम् अपरम् उक्तवान् - "पश्यतु, पत्न्याः नियन्त्रणं कर्तुं पतिः असमर्थः

अस्ति'' इति ।

तत् वचनं श्रुत्वा देवशर्मा कोपेन मनोरमायाः भुजं कम्पयन् - ''भवत्याः रोदनं स्थगयतु'' इति उक्तवान् ।

तदा मनोरमा व्यथाम् अनुभवन्ती - ''पश्यतु, भवान् द्वितीयवारं मां तर्जयन् अस्ति । एतत् भवान् स्मरतु'' इति उक्त्वा वेगेन ततः निर्गतवती ।

एतदनन्तरं देवशर्मा अधिक-जागरूकतया पत्नीं पश्यन् आसीत् । कस्याश्चित् अपि परिस्थितौ सः पत्नीं विहाय न भवति स्म ।

केषाञ्चित् दिनानाम् अनन्तरं देवशर्मणः पितृव्यस्य पुत्रः मृतः । तदा देवशर्मा मनोरमा च तत्र गतवन्तौ । यः मृतः तस्य पत्नी उच्चध्वनिना रोदनं कुर्वती आसीत् । तत् दृष्ट्वा अन्ये मनसि एव दुःखम् अनुभवन्ति स्म ।

तस्यां दुःखपरिस्थित्यां मनोरमा उच्चैः हसितवती । सर्वे तां विचित्रदृष्ट्या दृष्टवन्तः ।

तदा देवशर्मा मन्दस्वरेण तां सूचितवान् - ''एवं मा हसतु । सर्वे रोदनं कुर्वन्तः सन्ति'' इति ।

तथापि सा हासस्य निग्रहणं कर्तुं न शक्तवती । एतत् दृष्ट्वा नितरां खिन्नः देवशर्मा कोपेन तां ताडितवान् ।

अनुक्षणमेव मनोरमा रोदनं स्थगयित्वा - ''यः मृतः सः अदृष्टवान् । यतः एतावति काले एव सः चक्रवर्तिनः पुत्रः सन् पुनर्जन्म



प्राप्तवान् अस्ति । तत् अज्ञात्वा एते सर्वे रोदनं कुर्वन्तः सन्ति । अतः मम हासः आगतः । तत् भवतु नाम । भवान् तु इदानीं मम पितुः वचनस्य भङ्गं कृतवान् । अतः भवता सह न जीवामि'' इति देवशर्माणम् उक्त्वा ततः प्रस्थितवती । ताम् अवरोद्धुं देवशर्मा प्रयत्नमेव न कृतवान् । तथा एव निर्लिप्तः सन् स्थितवान् आसीत् ।

वेतालः एवं कथां समाप्य - ''हे राजन् ! अत्र यत् प्रवृत्तं तस्मिन् मम बहवः संशयाः सन्ति । देवशर्मा किमर्थं गन्धर्वराजस्य वचनम् उल्लङ्घितवान् ? 'येन केनचित् वा कारणेन यदि त्रिवारं भवता ताड्येत तर्हि एषा भवन्तं त्यक्त्वा गमिष्यति' इति गन्धर्वराजेन उक्तम् आसीत् । एतत्

वचनं सम्यक् स्मरति स्म देवशर्मा । तथापि सः तां त्रिषु सन्दर्भेषु ताडितवान् । किम् एतत् बुद्ध्या कृतम्, उत कोपवशात् ? किमर्थं सः मनोरमायै गमनार्थम् अवकाशं दत्तवान् ? तस्यां विद्यमाना प्रीतिः न्यूना जाता किम् ? मनोरमा अपि देवशर्मणि अनुरागवती आसीत् । तथापि सा किमर्थं देवशर्मणः त्यागे मतिं कृतवती ? किम् अविवेकिनी सा ? यदि एतेषां सन्देहानाम् उत्तरं भवान् जानन् अपि न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं भविष्यति'' इति अवदत् ।

तदा त्रिविक्रमः उक्तवान् - ''मानव-गन्धर्वयोः मध्ये यः विवाहः प्रचलति सः धर्मविरुद्धः अस्ति । देवशर्मणः मनोरमायां विद्यमाना प्रीतिः न्यूना न जाता । परन्तु सः स्वस्य मानवस्वभावं परिवर्तयितुं न शक्तवान् । तथा च मनोरमायाः मनस्तत्त्वमपि न परिवर्तितम् । तयोः द्वयोः स्वभावे विद्यमानः भेदः तयोः व्यवहारेण ज्ञातः । देवधर्मं मानवः आचरितुं न शक्नोति । सः सञ्जीवी । केवलं स्त्रीषु विद्यमानया प्रीत्या मानवजीवनस्य परिपूर्णता न भवति । देवशर्मा यदा पत्नीं त्रिवारं ताडितवान् तदा - 'समकालीनाः सञ्जीविनः किं चिन्तयन्ति' इति चिन्तितवान्, न तु मनोरमायाः पितुः नियमं स्मृतवान् । तथा च मनोरमा स्वस्मिन् विद्यमानया असाधारण्या शक्त्या अन्येषां भविष्यं ज्ञात्वा स्वेच्छया व्यवहृतवती । मानवानाम् आचारविचारविषये न सा चिन्तितवती एव । एतादृशं सूक्ष्मविचारं देवशर्मा ज्ञात्वा तस्यां विद्यमानां प्रीतिं न्यूनीकृतवान् । अपि च सा कदाचित् स्वस्मात् दूरं गमिष्यति इति कठोरसत्यं सः अनुभवबलात् ज्ञातवान् आसीत् एव । अतः एव सः मनोरमायाः गमनं न अवरुद्धवान्'' इति ।

एवं वदतः राज्ञः मौनभङ्गः यदा जातः तदा शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा यथापूर्वं वृक्षस्य शाखाम् अवलम्बितवान् ।





# विजयस्य साहसम्

दृढचित्तः त्रिविक्रमः पुनः अपि वृक्षस्य समीपम् आगतवान् । वृक्षम् आरुह्य शाखायां लम्बमानं शवं स्कन्धे आरोपितवान् । ततः अधः आगत्य पूर्ववत् मौनेन श्मशानं प्रति प्रस्थितवान् च । तदा शवे विद्यमानः वेतालः अवदत् - "अये राजन्, अस्यां घोररात्रौ, अस्मिन् भयङ्करे श्मशाने, भवतः कष्टसाध्यस्य श्रमस्य दर्शनेन ज्ञायते यत् भवान् विधिवञ्चितः इति । भवादृशाः पुरुषाः साहसवन्तः स्युः चेत् अपि भवतां प्रयत्नस्य परिणामः शून्यः एव भवति । यतः भवन्तः फलप्राप्तिसमये योग्यं निर्णयं न स्वीकुर्वन्ति । तस्य परिणामतः श्रमस्य साहसस्य च योग्यः फलितांशः न प्राप्यते । उदाहरणार्थं अपूर्वात् सौभाग्यात् वञ्चितस्य विजयस्य कथां श्रावयामि, येन भवतः मार्गायासः परिहृतः भवेत् । श्रद्धया शृणोतु

## वेतालकथा



तावत्'' इति ।

ततः वेतालेन कथा आरब्धा -

पूर्वं धीरसेनः नाम कश्चित् महाराजः चन्द्रपुरं पालयति स्म । तस्य पुत्री कमलमुखी रूपवती आसीत् । यः तां परिणयति सः एव अग्रे तस्य राज्यस्य राजा भवितुम् अर्हति स्म । अतः तां परिणेतुं बहवः राजकुमाराः विशेषतः प्रयतमानाः आसन् ।

राजकुमारी कमलमुखी स्वभावतः धीरा आसीत् । तस्याः एका इच्छा आसीत् यत् धीरः एव मां परिणयेत् इति । अतः सा पितरम् उक्तवती - ''स्पर्धायां जितवन्तम् एव अहं परिणेष्यामि'' इति । ततः स्वस्य मनसि स्थितायाः स्पर्धायाः स्वरूपं विवृतवती च । पुत्र्या सूचितं स्पर्धायाः स्वरूपं श्रुतवतः धीरसेनस्य आघातः अभवत् ।

अतः सः पुत्रीम् उक्तवान् - ''वत्से, एषा स्पर्धा सामान्या न । एतस्यां स्पर्धायां कोऽपि भागं वोढुं न अर्हति । अतः अन्यां काञ्चित् स्पर्धां सूचयतु भवती'' इति अवदत् ।

''तात ! अलं चिन्तया । यः मयि विशेषानुरागवान् भवति सः स्वप्राणान् तृणाय मन्यते एव । तादृशः कश्चित् मया सूच्यमानायां स्पर्धायां भागं गृह्णीयात् एव'' इति मन्दहासपूर्वकम् उक्तवती कमलमुखी ।

पुत्र्याः अचलम् अभिमतं ज्ञात्वा निरुत्तरः धीरसेनः - ''तथैव भवतु'' इति अवदत् ।

'यदि स्पर्धायाः नियमः पूर्वम् एव ज्ञायेत तर्हि कोऽपि स्पर्धायां भागं न गृह्णीयात् । अतः दिननिश्चयमात्रम् उद्घोषयामि' इति चिन्तितवान् धीरसेनः । तदनुगुणम् 'आगामिपूर्णिमायां स्पर्धा भविष्यति । स्पर्धायां यः जयं प्राप्स्यति तं राजकुमारी परिणेष्यति' इति समग्रे देशे सडिण्डिमघोषं वार्तां प्रसारितवान् सः ।


चन्द्रपुरस्य पार्श्वे एव श्रीरङ्गपुरं नाम कश्चन ग्रामः आसीत् । तस्मिन् ग्रामे विजयः नाम कश्चित् विकलाङ्गयुवकः आसीत् । तस्य द्वौ अपि हस्तौ न आस्ताम् । बाल्ये एव तदीया माता दिवङ्गता आसीत् । तस्य पिता अन्यां काञ्चित् परिणीतवान् आसीत् ।

विमाता विजयं सर्वदा पीडयति स्म । 'किमपि कार्यं कर्तुम् असमर्थः भवान् निष्प्रयोजकः, भूमेः भारभूतः च । भवादृशानां जीवनं मरणं चापि समानम् एव । धिक् भवतः जीवनम्' इत्यादिभिः कटुवचनैः सर्वदा विजयं निन्दति स्म सा । पुत्रस्य एतादृशीं स्थितिं दृष्टवतः पितुः महान् खेदः भवति स्म । किन्तु पत्न्याः धाष्टर्यस्वभावं स्मरन् सः पत्नीं किमपि न वदति स्म ।

अस्मिन् समये विजयः कमलमुख्याः स्वयंवरवार्ता श्रुतवान् । स्वयंवरं द्रष्टुं विजयस्य इच्छा अभवत् । साहसस्पर्धाम् अपि द्रष्टुम् इष्टवान् सः । अतः सः पूर्णिमायाः प्रभाते एव गृहतः प्रस्थाय चन्द्रपुरं प्राप्तवान् ।


स्पर्धायाः दिने विविधदेशेभ्यः समागताः राजकुमाराः, साहसिनः युवकाः च चन्द्रपुरस्य आस्थाने उपस्थिताः आसन् । स्वयंवरस्य वेदिकायां महाराजः धीरसेनः, राजकुमारी कमलमुखी, महामन्त्री मल्लिकवर्मा च उपविष्टाः आसन् ।

स्वयंवरस्य समयः यदा सन्निहितः तदा महामन्त्री आसनात् उत्थाय सभासदः उद्दिश्य – "राजकुमार्याः स्वयंवरस्य अङ्गतया स्पर्धा अस्ति इत्येतावन्मात्रं जानन्ति भवन्तः । किन्तु स्पर्धायाः नियमं न जानन्ति । तं नियमम् अहम् इदानीं वदामि । स्पर्धायां यः भागं वोढुम् इच्छति तेन दुर्गस्य उपरि गन्तव्यम् । दक्षिणदिशि विद्यमानं



गोपुरम् आरुह्य ततः अधः लङ्घनं करणीयम् । अधः त्रयाणां खड्गयुक्त-वलयानां मध्ये विद्यमाने स्थले सः पतेत् । खड्गानां मध्ये विद्यमानस्य स्थलस्य वैशाल्यं पादचतुष्टयपरिमितमात्रम् अस्ति । अतः दुर्गशिखरात् कूर्दनस्य प्रयत्नः प्राणापायाय अपि भवेत् इति मया पुनः कथनीयं नास्ति । राजकुमार्याः परिणयं यः इच्छति तेन एतावत् वा साहसं करणीयम् एव । अतः यः कमलमुख्यां विशेषानुरागवान् अस्ति सः अग्रे आगत्य स्पर्धायां भागं वहतु नाम" इति उद्घोषितवान् ।

स्पर्धायाः नियमश्रवणेन तत्र सम्मिलिताः सर्वे स्तम्भीभूताः अभवन् । किञ्चित्कालं सभायां मौनं प्रसृतम् आसीत् । क्रमशः



सभायां परस्परं सम्भाषणम् आरब्धम् ।

"एषा कीदृशी स्पर्धा ? दुर्गस्य उपरिष्टात् खड्गवलयानां मध्ये लङ्घनं मरणाय भवति । खड्गयुद्धं मल्लयुद्धं च वीराणां साहसिनां च निकषस्थानम् अस्ति । एषः महाराजः राजकुमारान् मारयितुम् इच्छति इति भाति । अतः एव एतादृशीं प्राणहारिणीं स्पर्धाम् आयोजितवान् अस्ति राजा । एतस्यां स्पर्धायां प्रविश्य मरण-प्राप्तिः तु सर्वथा मूर्खतायै" इति परस्परम् सम्भाषणम् आरब्धवन्तः राजकुमाराः ।

परन्तु कुतूहलेन स्पर्धां द्रष्टुम् आगतस्य विजयस्य चिन्तनं तु स्पर्धानियमश्रवणात् परिवृत्तम् । सः आसनतः उत्थाय महाराजस्य पुरतः आगतवान् । उक्तवान् च - "महाराज, अहं स्पर्धायां भागं वोढुं सिद्धः अस्मि" इति ।

महाराजः धीरसेनः हस्तद्वयविहीनं विजयम् आपादमस्तकं दृष्टवान् । 'यदि एषः स्पर्धायां जयं प्राप्स्यति तर्हि मम पुत्र्याः स्थितिः शोचनीया भविष्यति' इति चिन्तयन् सः खेदम् अनुभूतवान् । तथापि अनन्य-गतिकतया क्षणकालस्य मौनस्य अनन्तरं सः उक्तवान् - "तथैव भवतु" इति ।

अनेकेषु राजकुमारेषु सत्सु अग्रे आगतवन्तं विजयं दृष्टवती राजकुमारी महान्तं खेदम् अनुभूतवती । 'स्पर्धायाः नियमस्य अनुसारं विजयी एव मया परिणेतव्यः । अतः यदि एषः विकलाङ्गः विजयः जयं प्राप्नुयात् तर्हि एषः एव मया परिणेतव्यः भवेत्' इति चिन्तयन्ती सा भीता । किन्तु 'विकलाङ्गः कदापि एतस्यां स्पर्धायां विजयं प्राप्तुं न अर्हति' इत्येतत् चिन्तनं तस्याः आतङ्कं न्यवारयत् ।

सामान्यः कश्चित् स्पर्धायां भागं वहति इति ज्ञातवन्तः सर्वे राजकुमाराः अवमानिताः अभवन् । तेषु कश्चित् विजयम् उद्दिश्य उच्चस्वरेण उक्तवान् - "भोः, भवान् कः ? भवतः मातापितरौ कौ ? दुर्गस्य उपरिष्टात् अधः पतनेन मरणं निश्चितम् एव । एतत् दुःसाहसं भवतः मातापितृभ्यां किम् अनुमन्येत ? किमर्थं भवान् मृत्युमुखं स्वयं प्रविशति ? पूर्वापरम् अनालोच्य एतादृशे असाध्ये कार्ये प्रवेशः किं विवेकितां द्योतयति ? विकलाङ्गः


भवान् क्रीडास्पर्धादिषु भागं वोढुम् अपि असमर्थः । एवं स्थिते दुस्साध्ये एतस्मिन् कार्ये भवतः प्रवर्तनं कथं वा लाभाय भवेत् ? एतद्द्वारा आत्महत्या करणीया इति भवतः इच्छा वा ? कार्ये प्रवर्तनात् पूर्वं कृत्याकृत्यं लाभालाभं च परिशीलनीयम् एव । अतः अग्रे गमनात् पूर्वं सर्वं चिन्तयतु कृपया'' इति ।

विजयः एतत् वचनं श्रुतवान् । तथापि सः ततः पलायनं कर्तुं सिद्धः न आसीत् । सः दुर्गं प्रति गतवान् । दुर्गस्य उपरि गन्तुं तत्र एका निःश्रेणी आसीत् । 'एतस्याः आरोहणं कथम् ?' इति चिन्तयन् विजयः तत्रैव मौनं स्थितवान् ।

तदा महामन्त्री भटौ आदिष्टवान् - 'एतस्य साहाय्यं कुरुताम्' इति । भटौ जागरूकतया विजयम् उन्नीय दुर्गस्य उपरि नीतवन्तौ ।

विजयः उपरिष्टात् यदा अधः दृष्टवान् तदा तस्य पादौ कम्पितौ जातौ । भयेन तस्य शरीरे स्वेदः उत्पन्नः । रक्तगतेः वेगः अधिकः अभवत् । अधः स्थिताः खड्गवलयाः यमपाशाः इव अभासन्त । 'एतत् स्पर्धास्थानम् उत वधस्थानम् ?' इति सन्देहः अपि तस्य मनसि उत्पन्नः । 'स्पर्धायां भागग्रहणं परित्यज्य गच्छामि चेत् कथम्' इत्यपि विचारः तस्य मनसि क्षणकालम् आगतः । परन्तु विजयः सङ्कल्पं स्मरन् आत्मानं निगृहीतवान् । सकृत् शिरश्चालनेन मनसः दौर्बल्यं निवारितवान् सः । सर्वेषां दृष्टिः विजयस्य उपरि एव आसीत् ।





विजयः इष्टदेवं स्मरन् दुर्गतः खड्गवलयानां मध्ये लङ्घनं कृतवान् । एतत् अदृष्टपूर्वं साहसं दृष्ट्वा सर्वे राजकुमाराः, स्वयंवरं द्रष्टुम् आगताः सामान्याः जनाश्चापि रोमाञ्चिताः अभवन् ।

परन्तु अपरक्षणे एव सर्वे आनन्देन करताडनं कृतवन्तः । यतः अदृष्टवशात् विजयः अपायात् रक्षितः आसीत् । सः खड्गवलयानां मध्ये विद्यमाने रिक्ते स्थले पतितवान् आसीत् । अतः सः विशेषतः व्रणितः जातः न आसीत् ।

एतेन राजकुमारी स्तम्भीभूता अभवत् । 'एतादृशः विकलाङ्गः कश्चित् स्पर्धायां जयं प्राप्नुयात्, सः मया परिणेतव्यः भवेत्' इति सा कदापि न चिन्तितवती आसीत् । सा पूर्वं चिन्तितवती आसीत् - 'कश्चित् साहसी राजकुमारः स्पर्धायां जयं प्राप्स्यति, मम पतिः भविष्यति च' इति ।

क्षत्रियाणां नियमानुसारं राजकुमार्या विजयः एव परिणेतव्यः आसीत् । धीरसेनः पुत्र्याः स्थितिं दृष्ट्वा दुःखितः अभवत् । राजकुमारी कमलमुखी अपि विषण्णवदना अभवत् ।

एतयोः स्थितिं ज्ञात्वा विजयः वेदिकायां स्थितस्य महाराजस्य पुरतः आगतवान् । महाराजं नमस्कृत्य - "महाराज, अहं राजकुमारीं परिणेतुं सिद्धः न अस्मि । अतः अहं क्षन्तव्यः । स्पर्धायां भागग्रहणे राजकुमार्याः परिणयः कारणं न । स्पर्धायां जयस्य प्राप्तिः एव कश्चन विशेष-पुरस्कारः । स च पुरस्कारः अद्य मया प्राप्तः अस्ति" इति उक्त्वा ततः निर्गतवान् ।

वेतालः एवं कथां समाप्य - "महाराज, विजयस्य व्यवहारः कस्यचित् उन्मत्तस्य इव अस्ति किल ? राजकुमार्याः विवाहः यदि तस्य उद्देशः न आसीत् तर्हि सः तादृश्याम् अपायकर्यां स्पर्धायां किमर्थं भागं गृहीतवान् ? 'स्पर्धायां जयेन एव मया कश्चित् अमूल्यः पुरस्कारः प्राप्तः अस्ति' इति यत् तेन उक्तं तत् कस्यचित् उन्मत्तस्य प्रलपनम् इव भासते खलु ? सुखेन प्राप्तां राजपदवीं किमर्थं परित्यक्तवान् सः ? किम् एतत् सर्वं विधेः विलसितम् इति अस्माभिः परिचिन्तनीयम् ? यदि विजयः राजकुमारीं

कमलमुखीं परिणीतवान् स्यात् तर्हि चन्द्रपुरस्य राजा अभविष्यत् । राज्यप्राप्तिः च पुरस्कारप्राप्तिः इव अभविष्यत् । किन्तु विजयः राज्यप्राप्तिं निराकृत्य अपि उक्तवान् यत् मया कश्चन पुरस्कारः प्राप्तः इति । तेन प्राप्तः सः पुरस्कारः कः ? लाभालाभयोः भेदम् एव न अवगतवान् वा सः ? मम एतेषां सन्देहानां समाधानं जानन् अपि यदि भवान् न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति अवदत् ।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''विजयः विकलाङ्गः सन् जन्म प्राप्तवान् । बाल्ये एव तस्य माता दिवङ्गता । तस्य विमाता तं निन्दति स्म - 'भवान् निष्प्रयोजकः, भूमेः भारभूतः, भवतः जीवनेन कोऽपि लाभः नास्ति' इति । प्रतिदिनं तं निन्दन्ती सा तस्य अवमाननं करोति स्म । एतादृशाः चिन्तयन्ति यत् - 'अवसरे प्राप्ते यत्किमपि महत् कार्यं कृत्वा सर्वेषां पुरतः श्रेष्ठत्वं सम्पादनीयम्' इति । तादृशः अवसरः विजयस्य जीवने राजकुमार्याः स्वयंवर-रूपेण आगतः । राजकुमार्याः विवाहः एव तस्य लक्ष्यं न आसीत् एव । विजयः जानाति स्म यत् अहं राजकुमार्याः अनुरूपः न इति । 'राज्यपरिपालनं तु सामान्यं कार्यं न, स्पर्धायां जयप्राप्तिः इव सुलभम् अपि न' इति सः जानाति स्म । हस्तद्वयेन विहीनः कथं वा खड्गं गृहीत्वा युद्धं कुर्यात् ? एतत् सर्वं जानन् सः राजकुमार्याः विवाहं निराकृतवान् । अत्र विधेः विपर्यासः कोऽपि नास्ति । सर्वेषां पुरतः श्रेष्ठः भवितुम् एव सः स्पर्धायां भागं गृहीतवान् । सर्वेषां श्लाघनरूपः पुरस्कारः तेन प्राप्तः आसीत् । अतः सः राजकुमार्याः विवाहं तिरस्कृत्य ततः गतवान् । अतः विजयः उन्मत्तः इति कथने किञ्चिदपि सामञ्जस्यं नास्ति'' इति ।

एवं वदता त्रिविक्रमेण मौनभङ्गः कृतः आसीत् । अतः शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा यथापूर्वं वृक्षस्य शाखायां लम्बमानः स्थितवान् ।






# विकृतघ्नः

दृढव्रतः त्रिविक्रमः स्वीकृतं कार्यं परित्यक्तुम् अनिच्छन् पुनरपि वृक्षस्य समीपं गतवान् । वृक्षम् आरुह्य शाखायां लम्बमानं शवं स्कन्धे आरोप्य अधः आगतवान् । ततः यथापूर्वं मौनं श्मशानाभिमुखं प्रस्थितवान् च । तदा शवान्तर्गतः वेतालः अवदत् - "अये राजन् ! भवतः एषः महान् परिश्रमः स्वनिमित्तम् उत अन्यनिमित्तम् इत्येव न ज्ञायते मया । भवान् कश्चन देशपालकः इत्यतः अन्यः देशपालकः भवन्तम् एतादृशे कार्ये प्रवर्तयितुं न अर्हति । क्वचित् पण्डिताः भवन्तं कार्ये प्रवर्तितवन्तः स्युः । यतः पाण्डित्येन पदजालेन वा अन्यस्य बन्धने तेषां विशेषरुचिः भवति । भवान् अपि रामशास्त्री इव अन्येन प्रयुक्ते पदजाले पतितः स्यात् इति भाति मम । रामशास्त्री कः, तस्य कथा का इति ज्ञातुं कुतूहलं स्यात् खलु भवतः ? तस्य कथां विस्तरेण

## वेतालकथा



श्रावयामि, श्रद्धया श्रृणोतु तावत्'' इति ।

अनन्तरं वेतालेन कथा आरब्धा -

पूर्वं रामशास्त्री नाम कश्चित् आसीत् । सः अल्पे एव वयसि शास्त्रादीनि अधीत्य 'पण्डितः' इति ख्यातिं प्राप्तवान् आसीत् । तस्य अपेक्षा आसीत् यत् मया तादृशं पाण्डित्यं प्राप्तव्यं, येन मत्तः श्रेष्ठः पण्डितः कोऽपि न भवेत् इति । सः कदाचित् गृहम् आगतवन्तं पितुः बाल्यस्नेहितं शम्भुशर्माणं स्वस्य आशयं निवेदितवान् । सः पितुः बाल्यस्नेहितः शास्त्रम् अधीतवान् आसीत् । अतः कांश्चन शास्त्रसम्बद्धान् प्रश्नान् पृष्ट्वा उत्तरं च ज्ञात्वा सः रामशास्त्रिणम् उक्तवान् - ''भवतः पाण्डित्यम् अस्ति इति तु सत्यम् एव । तत्रापि अल्पे वयसि एतादृशस्य पाण्डित्यस्य प्राप्तिः नितरां अपूर्वा । तथापि असदृशं पाण्डित्यं प्राप्तव्यं चेत् नूतनपदानां सृष्टिः भवता करणीया, तानि पदानि व्यवहारे आनेतव्यानि च '' इति ।

''तथा नूतनशब्दानां सृष्टौ अतिसमर्थः एतावता एव कोऽपि अस्ति वा ?'' इति पृष्टवान् रामशास्त्री ।

''कुतो न ? अस्माकं ग्रामे देवशास्त्री नाम कश्चित् अस्ति । सः नूतनशब्दानां निर्माणे अर्थावगमने च नितरां समर्थः । किन्तु क्वचित् तेन प्रयुज्यमानानां पदानाम् अर्थम् अवगन्तुं पण्डिताः अपि क्लेशान् अनुभवन्ति । राज्ञः सम्माननम् अपि प्राप्तम् अस्ति तेन'' इति उक्तवान् शम्भुशर्मा ।

''एवं तर्हि सः मया द्रष्टव्यः । तस्य पाण्डित्यं कीदृशम् इति ज्ञातव्यम्'' इति उक्तवान् रामशास्त्री ।

''भवतु नाम । अहं तस्य परिचयं कारयामि । यदि गूढार्थगर्भितस्य वाक्यस्य प्रयोगं भवान् करोति, यदि वा नूतनपदानि प्रयुज्य भवान् व्यवहरति, तर्हि सः भवन्तं शिष्यत्वेन अङ्गीकुर्यात् । तेन भवतः श्रेयः निश्चितम्'' इति उक्तवान् शम्भुशर्मा ।

एतत् अङ्गीकुर्वन् रामशास्त्री तेन सह प्रस्थितः । मार्गे तस्य मनसि एका एव चिन्ता - देवशास्त्रिणा कीदृश्या शैल्या सम्भाषणं करणीयम् इति ।

शम्भुशर्मणः अनुपमा नाम पुत्री आसीत् । सा रूपेण बुद्धिमत्तया च अनुपमा

एव । 'यदि मम पुत्र्याः रामशास्त्रिणः च परस्परपरिचयः भवेत्, यदि च तयोः सम्मतिः स्यात् तर्हि कालान्तरे तयोः विवाहः निर्वर्तनीयः' इति चिन्तनम् आसीत् शम्भुशर्मणः । अतः रामशास्त्रिणः अनुचरणार्थम् अनुपमां नियोजितवान् आसीत् सः।

रामशास्त्री तु स्वपाण्डित्यस्य प्रदर्शनं कथम् इत्येव सदा चिन्तयन् भवति स्म । अतः सः अनुपमायाः सौन्दर्यं पाण्डित्यं वा द्रष्टुं न शक्तवान् एव । तां सामान्यसेविकां भावयन् सः सर्वाणि कार्याणि ताम् आदिशति स्म ।


द्वित्राणां दिनानां अनन्तरं रामशास्त्री आतङ्कमिश्रितेन स्वरेण स्वगतम् इव उक्तवान् - "श्वः मया देवशास्त्री द्रष्टव्यः" इति ।

"स तु इदानीं ग्रामे नास्ति । दिनद्वयानन्तरं प्रत्यागच्छेत् सः" इति उक्तवती अनुपमा ।

"इतोऽपि दिनद्वयस्य प्रतीक्षा करणाया वा मया ! अहो, दिनानि युगायन्ते अत्र" इति खेदेन उक्तवान् रामशास्त्री ।

"किमर्थं तावती चिन्ता भवतः ? दिनद्वयात्मके अवधौ नूतनानि पदानि सृष्ट्वा व्यवहारे प्रयुज्य अनुभवं सम्पादयतु भवान्" इति उक्तवती अनुपमा ।

"सर्वाणि अपि नूतनपदानि मया झटिति अवगम्यन्ते एव । यतः तादृशम् अपूर्वं पाण्डित्यम् अस्ति मम । देवशास्त्री अपि



येषां पदानाम् अर्थं न जानीयात् तादृशानि पदानि प्रयोक्तुम् अपि सामर्थ्यम् अस्ति एव मम । अतः किम् अभ्यासेन ?" इति सगर्वम् उक्तवान् रामशास्त्री ।

तदा अनुपमा मन्दहासपूर्वकम् उक्तवती - "भवान् तु महापण्डितः । भवता सह सम्भाषणं करणीयम् इति मम इच्छा । दिनद्वयं सम्भाषणं कुर्वन्तौ कालं यापयाव" इति ।

"पण्डितस्य मम पण्डितेन सह एव सम्भाषणं शोभते । किं सामान्यैः सह व्यवहारेण?" इति पुनरपि गर्वेण एव उक्तवान् रामशास्त्री ।

"भवादृशानां निमित्तम् एव 'विकृतघ्न'-नामकं पदं सृष्टम् अस्ति" इति कोप-



मिश्रितेन स्वरेण उक्त्वा खेदेन ततः निर्गतवती अनुपमा ।

अनुपमया प्रयुक्तं 'विकृतघ्नः' इत्येतत् पदं रामशास्त्रिणः पीडायै अजायत । बहुधा चिन्तनस्य अनन्तरम् अपि तेन न ज्ञातं यत् अनुपमया किमर्थं मयि 'विकृतघ्नः' इत्येतत् पदं प्रयुक्तम् इति । अतः सः अनुपमाम् आहूय पृष्टवान् - "कृतघ्नताम् अकृतवति मयि विकृतघ्नः इति शब्दः प्रयुक्तः भवत्या । मया का कृतघ्नता आचारिता ?" इति ।

"यदा भवान् अस्मद्गृहम् आगतवान् तदा आरभ्य मया भवतः सेवा कृता । भवतः प्रशंसा अपि कृता । एतस्य प्रतिफलं मया किं प्राप्तम् ? सेवा ससन्तोषं स्वीकृता भवता । न मम सौन्दर्यातिशयः लक्षितः । मम बुद्धिमत्ताम् अपरीक्ष्य एव भवता निर्णीतं यत् अहं सेवामात्रार्थम् अर्हा इति । उपकारस्मरणप्रवृत्तिः एव नास्ति भवतः । अतः भवान् विकृतघ्नः एव" इति उक्तवती अनुपमा ।

"पुनः अपि मयि विकृतघ्नपदस्य प्रयोगः ! एतादृशं पदं लोके व्यवहारे नास्ति एव । कृतम् उपकारं यः विस्मरति सः उच्यते - कृतघ्नः इति । विकृतघ्नः इति पदं तु न प्रयुक्तपूर्वम्" इति उक्तवान् रामशास्त्री ।

"भवान् कृतघ्नमात्रं न । अतः एव मया विकृतघ्नपदं प्रयुक्तम् । भवादृशानां निमित्तम् एव देवशास्त्रिणा एतत् पदं सृष्टम् अस्ति" इति उक्तवती अनुपमा ।

विकृतघ्नशब्दः देवशास्त्रिणा सृष्टः इति श्रुत्वा रामशास्त्री निर्णीतवान् यत् एतस्य पदस्य विशिष्टार्थः कोऽपि अस्ति एव इति । अतः सः तस्य पदस्य अर्थस्य अवगमनार्थं बहुधा प्रयत्नं कृतवान् । तथापि अर्थः तु न अवगतः । अतः सः पुनरपि अनुपमां प्रार्थितवान् -"कृपया एतस्य पदस्य अर्थं वदतु" इति ।

तदा अनुपमा उक्तवती - "महापण्डितः भवान् एतस्य पदस्य अर्थम् इतोऽपि अवगन्तुं न शक्तवान् ? न हि सर्वः सर्वं जानाति इति श्रूयते । अतः भवतः साहाय्यार्थं वदामि । विरूपम् उद्दिश्य एतत् पदम् ऐदम्प्राथम्येन प्रयुक्तम् । अतः विरूपं


यदि भवान् द्रक्ष्यति तर्हि तस्य पदस्य अर्थस्य अवगमनं सुकरं स्यात्'' इति ।

''कोऽयं विरूपः नाम जनः ?'' इति पृष्टवान् रामशास्त्री ।


''विरूपः नाम कश्चन कृषिकः । सः कदाचित् निश्चितवान् यत् अल्पेन मूल्येन क्षेत्रं क्रेतव्यम् इति । तस्य समीपे धनं न आसीत् । तदा प्रतिवेशी शिवरामः ऋणरूपेण धनं दत्तवान् । तेन क्षेत्रं क्रीतवान् विरूपः । तस्मिन् क्षेत्रे तेन निधिः प्राप्तः । ततः शिवरामस्य ऋणं प्रत्यर्पितवान् विरूपः । अत्रान्तरे शिवरामस्य पुत्र्याः विवाहः निश्चितः । पुत्रीविवाहस्य निर्वर्तनार्थं विरूपम् ऋणं याचितवान् शिवरामः । तदा विरूपः दर्पेण उक्तवान् - ''निर्धनाय मया ऋणं न दीयते । निर्धनेन ऋणस्वीकारचिन्ता न करणीया अपि'' इति ।

पुनः कदाचित् क्षेत्रे कार्यं कुर्वाणः विरूपः सर्पेण दष्टः अभवत् । अनतिदूरे क्षेत्रे कार्यं कुर्वाणः शम्भुशरणः धावन् आगत्य विरूपं स्कन्धे आरोप्य मान्त्रिकस्य समीपं नीतवान् । 'यदि अल्पः विलम्बः कृतः स्यात् तर्हि एतस्य प्राणाः अपगताः अभविष्यन्' इति वदन् मान्त्रिकः योग्यया चिकित्सया विरूपम् उज्जीवितवान् ।

अनन्तरदिने शम्भुशरणः अपि सर्पेण दष्टः अभवत् । तत्समये विरूपः तेन एव मार्गेण गच्छन् आसीत् । यदा मान्त्रिकसमीपं शम्भुशरणस्य नयनस्य प्रस्तावः आगतः तदा - 'शम्भुशरणं स्कन्धे आरोप्य नेतुं मम




सामर्थ्यं नास्ति' इति उक्तवान् विरूपः । तदा शम्भुशरणस्य पत्न्या सूचितं यत् मान्त्रिकं विषयं निवेद्य तम् अत्र आनयतु इति । तदा विरूपः उक्तवान् 'अहम् उत्तरदिशि प्रस्थितवान् अस्मि । मान्त्रिकस्य गृहं तु दक्षिणदिशि अस्ति । अतः अहम् एतत् कार्यं कर्तुं न शक्नोमि' इति । तदा शम्भुशरणस्य पत्नी उक्तवती - 'एवं तर्हि भवान् अत्र रक्षकत्वेन तिष्ठतु । अहम् एव गत्वा मान्त्रिकम् आनेष्यामि' इति । 'न शक्यते एतत् । मया त्वरया अन्यत्र गन्तव्यम्' इति वदन् ततः निर्गतवान् विरूपः । ततः सौभाग्यवशात् मान्त्रिकः कस्माच्चित् वार्तां श्रुत्वा धावन् आगत्य शम्भुशरणस्य प्राणान् रक्षितवान् । एवम्



अस्ति विरूपस्य पृष्ठभूमिका'' इति उक्तवती अनुपमा ।

''एतं मनसि निधाय एव कृतघ्नपदं निर्मितम् इति भाति'' इति उक्तवान् रामशास्त्री ।

''कृतघ्नपदं न, अपि तु विकृतघ्नपदम्'' इति उक्तवती अनुपमा ।

''कृतम् उपकारं ये न स्मरन्ति ते कृतघ्नाः । विकृतघ्नः इत्यस्य पदस्य न कोऽपि अर्थः'' इति उक्तवान् रामशास्त्री ।

''किम् अधिकचर्चया ? सकृत् भवान् तं विरूपं दृष्ट्वा आगच्छति चेत् सुष्ठु भवेत्'' इति सूचितवती अनुपमा ।

रामशास्त्री विरूपं द्रष्टुं ततः प्रस्थितवान् । 'विरूपस्य गृहं कुत्र' इति प्रष्टव्यम् इति यावत् सः चिन्तयन् आसीत् तावता मार्गपार्श्वे कलहायमानौ उभौ दृष्टौ । तयोः एकः दृढकायः मल्लः इव दृश्यते स्म । अपरः क्षीणकायः । दृढकायः क्षीणकायं कण्ठे गृहीत्वा प्रहरन् आसीत् । रामशास्त्री तयो कलहं निवारयितुम् इच्छन् कलहस्य कारणं पृष्टवान् । तदा दृढकायः उक्तवान् - ''श्रीमन्! एषः नद्यां पतितः सन् मज्जनं प्राप्नुवन् आसीत् । अहं प्राणापायम् अविगणय्य नद्यां तरन् एतस्य रक्षणं कृतवान् । एतत्सर्वं दिनद्वयात् पूर्वं प्रवृत्तम् । अद्य अहम् -'आरोग्यं कथम् अस्ति ?' इति प्रष्टुं यदा एतस्य समीपम् आगतवान् तदा एषा माम् अनभिजानन् - 'कः भवान् ?' इति पृष्टवान् । अहं दिनद्वयात् पूर्वं प्रवृत्तं स्मारितवान् । 'मया सा घटना एव न स्मर्यते' इति उक्तवान् एषः । 'भवान् सर्वथा बुद्धिहीनः' इति वदन् माम् उपहसितवान् अपि । एतादृशस्य अपि उपकारं कृतवान् अहं निश्चयेन बुद्धिहीनः एव । एतस्मिन् विवेकम् उत्पादयितुं मम बुद्धिमत्ता अपर्याप्ता । अतः एव देहदण्डनपूर्वकम् एतं विवेकं बोधयन् अस्मि'' इति ।

रामशास्त्रिणा सर्वम् अवगतम् । 'एषः कृशकायः एव विरूपः स्यात्' इति चिन्तितवान् सः दृढकायम् उद्दिश्य - ''मान्यवर ! किम् एतादृशे क्षीणकाये जने देहबलस्य प्रयोगेण ? एषः केनचित् विशेषकारणेन एवं व्यवहृतवान् स्यात् । तत् कारणं किम् इति ज्ञात्वा आगत्य अहं

वदिष्यामि । अतः इदानीम् एतं परित्यज्य गच्छतु भवान्'' इति उक्तवान् ।

रामशास्त्रिणः मुखस्य तेजस्वितां दृष्ट्वा समाहितः सन् सः दृढकायः ततः निर्गतवान् । तदा रामशास्त्री तं क्षीणकायं पृष्टवान् -''भवान् एव खलु विरूपः ?'' इति ।

''भवान् मत्तः किम् इच्छति इति अहं न जानामि । अहं कः इति भवान् जानाति । किन्तु भवान् कः इति अहं न जानामि । तथा ज्ञातव्यम् इति इच्छा अपि नास्ति मम'' इति वदन् विरूपः ततः निर्गतवान् । दीर्घं निश्श्वस्य प्रतिगतवान् रामशास्त्री ।

''विरूपः दृष्टः खलु भवता ?'' इति पृष्टवती अनुपमा ।

''आम् । वार्तालापः अपि कृतः'' इति उक्तवान् रामशास्त्री । ततः सः प्रवृत्तं सर्वं निवेद्य अनुपमां पुनः उक्तवान् - ''विरूपस्य निन्दनार्थं कृतघ्नपदम् अपर्याप्तम् । अतः एव देवशास्त्रिणा विकृतघ्नपदं सृष्टम् अस्ति । विशेषेण यः कृतघ्नः भवति सः एव विकृतघ्नः । 'वि' इत्येतस्य उपसर्गस्य योजनात् कृतघ्नतायाः परा काष्ठा द्योतिता भवति । एवं ननु?'' इति ।

''शब्दार्थविषये सम्यक् एव चिन्तितं भवता । किन्तु विकृतघ्नपदस्य वास्तविकः अर्थः तु इतोऽपि न अवगतः'' इति हसन्ती उक्तवती अनुपमा ।

तावता तत्र आगतः शम्भुशर्मा रामशास्त्रिणम् उक्तवान् -''पाण्डित्येन



अनुपमाम् अन्वर्थनामधेयाम् एतां मम पुत्रीम् एतावता भवान् अवगतवान् स्यात् इति अहं चिन्तयामि । वस्तुतः देवशास्त्री नाम कोऽपि नास्ति । भवतोः मेलनार्थम् एव मया देवशास्त्री सृष्टः आसीत्'' इति ।


एतत् श्रुतवान् रामशास्त्री आश्चर्येण [illegible]ः सन् क्षणकालं मौनम् आश्रितवान् । ततः अनुपमाम् उद्दिश्य ''भद्रे, विकृतघ्नपदस्य वाच्यत्वं प्राप्तुम् अहं न इच्छामि । कृपया क्षाम्यतु माम्'' इति उक्तवान् ।

वेतालः एवं कथां समाप्य अवदत् ''राजन् ! शब्दाः स्वेच्छया स्रष्टुं शक्याः कदाचित् । किन्तु तत्पदवाच्यः कोऽपि पदार्थः अस्ति चेदेव तस्य सार्थकता ।

अन्यथा निरर्थकता । अनुपमा निरर्थकं कञ्चित् शब्दं सृष्ट्वा तत् रामशास्त्रिणि प्रयोज्य 'भवान् पण्डितः न' इति परोक्षतया ज्ञापितवती । विकृतघ्नपदस्य प्रयोगं कुर्वती रामशास्त्रिणि भ्रमम् उत्पादितवती । किम् एतत् उचितम् ? अनुपमायाः व्यवहारः किं न्याय्यः ? किम् अनुपमा पाण्डित्येन रामशास्त्रिणम् अतिशेते ? रामशास्त्री किमर्थं क्षमायाचनं कृतवान् ? मम एतेषां सन्देहानां समाधानं जानन् अपि यदि भवान् न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति ।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''अनुपमा-रामशास्त्रिणोः पाण्डित्ये तारतम्यभावं न पश्यामि अहम् । रामशास्त्री पण्डितः, स्फुरद्रूपी, बन्धुश्च इत्यतः तस्य सेवां श्रद्धया कृतवती अनुपमा । किन्तु रामशास्त्री तस्याः वैशिष्ट्यम् अवगन्तुं न शक्तवान् । देवशास्त्रिणः पाण्डित्येन आत्मनः पाण्डित्यं तोलयन् सः अनुपमायाः पाण्डित्यं न लक्षितवान् एव । 'रामशास्त्रिणः पाण्डित्यम् अस्ति चेदपि लौकिकव्यवहारज्ञानं नास्ति' इति जानती अनुपमा तं परिष्कर्तुम् इच्छन्ती विरूपसमीपं प्रेषितवती । विरूपस्य व्यवहारं दृष्ट्वा तदीयां कृतघ्नतां ज्ञातवान् अपि रामशास्त्री स्वस्य कृतज्ञतारहितं व्यवहारं न अवगतवान् एव । 'यः कृतम् उपकारं केषाञ्चित् दिनानाम् अनन्तरं विस्मरति सः कृतघ्नः । यः कृतम् उपकारं तत्क्षणे एव विस्मरति सः विकृतघ्नः' इति अनुपमायाः चिन्तनम् । अतः एव सा विकृतघ्नपदं सृष्टवती, रामशास्त्रिणि प्रयुक्तवती च । देवशास्त्री नास्ति इति वदन् शम्भुशर्मा यदा आनयनोद्देशं विवृतवान् तदा रामशास्त्री कृतज्ञतारहितं स्वस्य व्यवहारम् अवगतवान् । ततः लज्जितः सः अनुपमां क्षमां प्रार्थितवान्'' इति ।

एवं वदता त्रिविक्रमेण मौनभङ्गः कृतः आसीत् । अतः शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा यथापूर्वं वृक्षस्य शाखाम् अवलम्बितवान् ।






# अप्रियविवाहफलम्

दृढचित्तः त्रिविक्रमः पुनः अपि वृक्षस्य समीपम् आगतवान् । वृक्षम् आरुह्य शाखायां लम्बमानं शवं स्कन्धे आरोपितवान् । ततः अधः आगत्य पुनः अपि यथापूर्वं मौनं श्मशानं प्रति प्रस्थितवान् च । तदा शवान्तर्गतः वेतालः अवदत् - ''अये राजन् ! भवतः दृढचित्ततां पश्यामि चेत् भासते यत् स्वीकृतकार्यस्य समाप्ति-पर्यन्तं श्मशाने एव भवान् जीवनं यापयेत् इति । किन्तु किम् एतादृशेन जीवनेन ? स्वहितम् अपि उपेक्ष्य अन्येषाम् अहितं कुर्वाणाः दुष्टाः अपि भवन्ति लोके । एतादृशान् दृष्ट्वा एव केनचित् सुभाषित-कारेण उक्तम् अस्ति - 'ये स्वहितम् अपि नाशयन्तः परेषाम् अहितम् एव कुर्वन्ति ते मानुषराक्षसेभ्यः अपि अधमाः । तान् निर्देष्टुं कोऽपि शब्दः एव नास्ति लोके' इति । तादृशजनैः भवान् वञ्चितः भूत्वा कष्टानि सहमानः स्यात् वा इति मम मनसि संशयः उत्पन्नः अस्ति । यदि मम ऊहा वास्तविकी तर्हि इदानीम् एव स्वस्य कार्यं त्यक्त्वा

# वेतालकथा






स्वराज्यं गत्वा सुखेन जीवनं वरं भवेत् । यतः दुष्टबुद्धयः कदापि परिवर्तिताः न भवन्ति । ततः दूरे स्थितिः एव योग्यः मार्गः । अत्र उदाहरणरूपेण अहं चक्रधर-नामकस्य दुष्टबुद्धेः कथां श्रावयामि । श्रद्धया शृणोतु तावत्, येन विवेकप्राप्तिः, मार्गायासपरिहारश्च भवतः भवेत्'' इति ।

अनन्तरं वेतालेन कथा आरब्धा -

''कस्मिंश्चित् ग्रामे पूर्वं चक्रधरनामकः कश्चित् युवकः आसीत् । तस्य बान्धवः कोऽपि न आसीत् । सः कष्टेन कार्यं कुर्वन् एकस्मिन् लघुगृहे वासं करोति स्म । यदा यदा समयः प्राप्यते तदा तदा सः ग्रामपण्डितानां समीपं गत्वा किञ्चित् शास्त्रज्ञानं सम्पादयति स्म । एवं निरन्तर-प्रयत्नं कुर्वन् सः शास्त्रनिपुणः जातः ।

तस्मिन् ग्रामे एव सुशीलानामिका युवतिः आसीत् । एकदा सा विचित्रम् एकं स्वप्नं दृष्टवती । तत्र कश्चित् संन्यासी तया दृष्टः । सः संन्यासी सुशीलाम् उक्तवान् - ''योग्येन वरेण सह भवत्याः विवाहः भविष्यति चेत् भवती जीवने प्रभूतं सुखम् अनुभविष्यति'' इति ।

''योग्यः वरः कः इति अहं कथं ज्ञातुं शक्नोमि ?'' इति सुशीला संन्यासिनं पृष्टवती ।

''आकाशे कति नक्षत्राणि सन्ति इति भवती यदा पृच्छति तदा 'आवां विवाहानन्तरं मिलित्वा गणनां कृत्वा नक्षत्राणि कति सन्ति इति जानीयाम' इति यः वदति सः एव योग्यः वरः इति जानातु भवती'' इति संन्यासी उक्तवान् ।

जागरणानन्तरं सुशीला स्वप्नं स्मृत्वा आश्चर्यचकिता अभवत् । गृहे एतं विचारं यं कमपि न उक्तवती सा ।

एकदा मध्याह्ने सुशीला सखीभिः सह उद्यानं गतवती । तत्र सर्वाः नेत्रबन्धक्रीडां क्रीडन्त्यः आसन् । तदा सुशीला एकस्य वृक्षस्य पार्श्वे निलीय स्थातुं गतवती । तत्र स्थितः कश्चन सर्पः प्रमादवशात् तया पादेन स्पृष्टः । तदा सः सर्पः फूत्कुर्वन् फणाम् उन्नीय दंष्टुम् उद्युक्तः ।

तस्मिन् समये एव कश्चित् युवकः अनिरीक्षितरूपेण तत्र आगत्य तस्याः हस्तम् आकृष्य तां दूरं नीतवान् । सर्पः वेगेन ततः निर्गतवान् ।

तदा आश्चर्येण सुशीला हस्तं गृहीतवन्तं दृष्टवती । सः एव चक्रधरः आसीत् । चक्रधरः सुशीलायाः सौन्दर्यम् एव पश्यन् मन्त्रमुग्धः जातः । सुशीला अपि चक्रधरस्य विषयम् इतः पूर्वं एव श्रुतवती आसीत् ।

परन्तु तं समीपतः इदम्प्रथमतया पश्यन्ती आसीत् सा ।

सा चक्रधरंम् उक्तवती - ''भवान् मम प्राणान् रक्षितवान् । अतः कृतज्ञा अस्मि अहम्'' इति ।

''जीवरक्षणार्थमेव भवतीम् अहं स्पृष्टवान् । किन्तु ततः परमानन्दः प्राप्तः अस्ति मया । अतः मया एव कृतज्ञता समर्पणीया भवत्यै'' इति चक्रधरः हसन् उक्तवान् ।

चक्रधरेण तादृशचातुर्येण उक्तं वचनं श्रुत्वा सुशीला चिन्तितवती यत् - 'एषः एव मम योग्यः वरः स्यात्' इति ।

अतः अनुक्षणमेव सा चक्रधरं पृष्टवती - ''भवतः कथनशैलीतः भाति यत् भवान् निश्चयेन अतीव चतुरः इति । तर्हि वदतु तावत् - आकाशे कति नक्षत्राणि सन्ति ?'' इति ।

''वक्तुं शक्नोमि । परन्तु भवती कोपं कुर्यात् इति मम भयम्'' इति चक्रधरः उक्तवान् ।

''कोपं न करोमि । वदतु भवान्'' इति सुशीला उक्तवती ।

''बहूनि वर्षाणि यावत् महता कष्टेन नक्षत्राणां गणनां कृतवान् अहम् । गणनायाः समाप्तेः अनन्तरम् अपि एकं द्वयं वा मया न गणितं स्यात् इति मम संशयः आगतः । पुनः गणनां कर्तुं मम सामर्थ्यं नास्ति । यथा नक्षत्रगणनायां मम आसक्तिः अस्ति तथा कस्याश्चित् कन्यायाः अपि यदि आसक्तिः स्यात् तर्हि तादृशी एव परिणेतव्या इति मम इच्छा । भवती यदि तादृशी कन्या स्यात् तर्हि आवाभ्यां मिलित्वा नक्षत्रगणनां कर्तुं




शक्यते'' इति चक्रधरः उक्तवान् ।

तत् उत्तरं श्रुत्वा - 'एषः एव मम योग्यः वरः' इति ज्ञातवती सुशीला लज्जया ततः धावितवती ।

यदा सा गृहं प्राप्तवती तदा गृहे शशिकान्तनामकः युवकः आसीत् । सः सुशीलायाम् अनुरक्तः आसीत् । विवाहनिमित्तं सः सुशीलायाः पित्रे सहस्रं सुवर्णनाणकानि दातुं सिद्धः आसीत् । एतं प्रस्तावं सुशीलायाः पिता अङ्गीकृतवान् आसीत् अपि ।

किञ्चित्समयानन्तरं शशिकान्तः ततः निर्गतः । तस्य गमनस्य अनन्तरं सुशीला मातुः समीपं गत्वा स्वस्वप्नविचारं मातरम् उक्तवती । 'अहं चक्रधरमेव परिणेष्यामि' इति दृढस्वरेण उक्तवती च ।

माता एतं विषयं सुशीलायाः पितरं सूचितवती । तत् श्रुत्वा पिता पुत्रीम्



उक्तवान् - ''स्वप्नविषयः साकारः भवेत् एव इति वक्तुं न शक्यते । चक्रधरः सुन्दरः अस्ति इति कारणतः भवती तम् इच्छति । किन्तु सौन्दर्यमात्रं दृष्ट्वा निर्धनाय तस्मै चक्रधराय अहं भवतीं दातुं सर्वथा न सिद्धः'' इति ।

पितुः स्वभावं सम्यक् जानती सुशीला पितरम् उक्तवती - ''मम स्वप्नः अवितथः इति निरूपयितुं किञ्चित् कालावकाशं ददातु । वर्षं यावत् मम विवाहं व्याक्षिपतु । तावति काले चक्रधरः, शशिकान्तस्य समीपे यावत् धनम् अस्ति ततोऽपि अधिकं धनं सम्पादयिष्यति चेत् एव तेन सह मम विवाहं कारयतु'' इति ।

तदा सुशीलायाः पिता उच्चैः हसन् - ''वर्षाभ्यन्तरे चक्रधरः लक्षं सुवर्णनाणकानि सम्पादयेत् वा ? इदानीम् एव शशिकान्तः लक्षाधीशः अस्ति इति भवती न जानाति वा ? लक्षसुवर्णनाणकानां सम्पादने कियान् क्लेशः अस्ति इति प्रायः भवती न जानाति । अतः वदन्ती अस्ति यत् चक्रधरः वर्षाभ्यन्तरे लक्षं सुवर्णनाणकानि सम्पादयिष्यति इति । किन्तु मम लोकानुभवः वदति यत् चक्रधरः वर्षाभ्यन्तरे तावत् धनं सम्पादयितुं न शक्नोति इति'' इति उक्तवान् ।

''वरत्वं प्राप्तुं चक्रधरस्य योग्यता अस्ति चेत् सः निश्चयेन तावत् धनं सम्पादयिष्यति'' इति विश्वासेन उक्तवती सुशीला ।

तदा तस्याः पिता 'अस्तु' इति अङ्गीकारं सूचितवान् ।

सुशीला चक्रधरं सर्वं विषयं सूचितवती । चक्रधरस्य मनसि अपि 'सुशीला परिणेतव्या' इति दृढसङ्कल्पः आसीत् । अतः सः धनं सम्पादनीयम् एव इति निश्चित्य ग्रामं त्यक्त्वा नगरं गतवान् । तत्र भिन्न-भिन्न-कार्याणि कृतवान् सः । मासः अतीतः चेदपि एकशतं रूप्यकाणि अपि न सङ्गृहीतानि चक्रधरेण । लक्षरूप्यकसम्पादनं मया असाध्यम् इति चिन्तयतः तस्य निराशा जाता ।

अत्रान्तरे कञ्चित् संन्यासिनम् अपायात् रक्षितवान् चक्रधरः । तेन सन्तुष्टः संन्यासी चक्रधरस्य मुखात् तदीयं जीवनविवरणं सर्वं ज्ञात्वा पृष्टवान् - ''वत्स ! अल्पकाले प्रभूतस्य धनस्य सम्पादनार्थम् एकः एव मार्गः अस्ति । परन्तु सः कष्टकरः मार्गः । तेन मार्गेण कार्यं साधनीयं चेत् महत् साहसं करणीयं भवेत् । भवान् तादृशं साहसं कुर्यात् वा ?'' इति ।

"तस्मिन् प्रयत्ने मम जीवहानिः भवति चेदपि चिन्ता नास्ति । सर्वं कर्तुम् अहं सिद्धः अस्मि" इति चक्रधरः विश्वासयुक्तेन स्वरेण उक्तवान् ।


"नगरात् किञ्चिद्दूरे किश्चन अरण्यम् अस्ति । तस्मिन् अरण्ये एका गुहा अस्ति । तस्यां गुहायां निधिः अस्ति । परन्तु तं निधिं कश्चित् राक्षसः रक्षन् भवति । अतः ततः निधेः स्वीकरणे महान् क्लेशः अस्ति । यदि भवतः सामर्थ्यम् अस्ति तर्हि तं गुहास्थं निधिं प्राप्तुं प्रयत्नं करोतु । दैवानुग्रहः अस्ति चेत् भवान् निधिं प्राप्नुयात् । अन्यथा राक्षसस्य आहारः भवेत्" इति संन्यासी उक्तवान् ।

संन्यासिना उक्तं विवरणं ज्ञात्वा चक्रधरः ततः प्रस्थाय अरण्यं गतवान् । तत्र किञ्चित्कालम् अन्विष्य सः निधेः गुहां प्राप्तवान् । गुहायाः पुरतः महापर्वतः इव स्थितः कश्चन राक्षसः निद्रां कुर्वन् आसीत् । चक्रधरः विनाशब्दं गुहायाः समीपं गतवान् ।

तावति काले एव राक्षसः उत्थाय चक्रधरस्य हस्तं गृहीत्वा - "मां वञ्चयितुं प्रयत्नं करोति वा भवान् ? मयि अत्र उपस्थिते, मां धिक्कृत्य गुहां प्रविशन् अस्ति खलु भवान् ? कियत् धैर्यं भवतः ? कः भवान् ? किं प्राणाः भवतः प्रियाः न सन्ति ?" इति क्रोधेन पृष्टवान् ।


तदा चक्रधरः धैर्येण अग्रे गत्वा राक्षसं स्वकथां विवृतवान् ।

"सः संन्यासी भवन्तम् अत्र प्रेषितवान् वा ? तर्हि भवतु तावत्" इति वदन् तृप्त्या शिरः चालयन् राक्षसः स्वकथां चक्रधरं



श्रावितवान् - "पूर्वजन्मनि सुशीला मम पुत्री आसीत् । तस्याः विरोधम् उपेक्ष्य अहं तस्याः विवाहं निर्वर्तितवान् । एतेन नितरां खिन्ना सा आत्महत्यां कृतवती । तेन कारणेन अस्मिन् जन्मनि राक्षसरूपेण जन्म प्राप्तवान् अस्मि । 'सुशीला एतं विवाहं सर्वथा न इच्छति' इति जानन् अपि सुशीलां परिणीतवान् इति कारणतः सुशीलायाः पतिः संन्यासी सन् जन्म प्राप्तवान् । आवयोः उभयोः अपि पूर्वजन्मनः ज्ञानम् अस्ति । पूर्वजन्मनि कृतस्य पापस्य परिहारार्थम् एतस्मिन् जन्मनि आवां प्रयत्नं कुर्वन्तौ स्वः । अतः एव संन्यासी सुशीलायाः स्वप्ने आगत्य भवति तस्याः अनुरागम् उत्पादितवान् । गतजन्मनि सुशीला यम् इष्टवती आसीत् सः एव अस्ति भवान्" इति ।

राक्षसात् एतत् सर्वं श्रुत्वा अतीव



सन्तुष्टः चक्रधरः पृष्टवान् - ''एवं तर्हि भवान् मम साहाय्यं करोति एव किल ?'' इति ।

''निश्चयेन साहाय्यं करिष्यामि । परन्तु भवता अपि मम एकः उपकारः करणीयः'' इति चक्रधरं राक्षसः उक्तवान् ।

''अल्पसामर्थ्यवान् मानवः अस्मि अहम् । भवान् तु महाबलशाली अस्ति । एवं स्थिते अहं भवादृशस्य कं वा उपकारं कर्तुं शक्नुयाम् ?'' इति आश्चर्येण राक्षसं पृष्टवान् चक्रधरः ।

''शृणोतु ! अहं भवते द्विलक्षरूप्यकाणि दास्यामि । ततः भवतः सुशीलायाः च विवाहः भविष्यति । किन्तु वर्षाभ्यन्तरे पुनः अन्यत्र परस्परविवाहम् अनिच्छतोः वधूवरयोः विवाहः निर्वर्तनीयः भवता'' इति सूचितवान् राक्षसः ।

तदा चक्रधरः महत् आश्चर्यम् अनुभवन् पृष्टवान् - ''तेन भवतः कः लाभः भविष्यति ?'' इति ।

राक्षसः क्षणकालस्य मौनस्य अनन्तरम् उक्तवान् - ''अस्यां गुहायां अक्षयनिधिः अस्ति । इतः यावत् धनं स्वीक्रियते तावत् पुनः उत्पद्यते । अतः अहर्निशम् एतस्य रक्षणं करणीयम् । एतस्मिन् जन्मनि शशिकान्तेन सह सुशीलायाः विवाहं तस्याः पिता यदि अकारयिष्यत् तर्हि पुत्र्या अनिष्टं विवाहं सः कारितवान् भवति इत्यतः तेन अग्रिमजन्मनि राक्षसजन्म प्राप्तम् अभविष्यत् । तदा एतस्मात् जन्मनः मम विमुक्तिः अभविष्यत् । तथैव शशिकान्तः संन्यासिजन्म प्राप्स्यत् अपि । इदानीम् आवयोः द्वयोः अपि विमुक्तिः नास्ति'' इति ।

तदा चक्रधरः संशयेन पृष्टवान् - ''अनिष्टः विवाहः कुत्रापि न भविष्यति चेत् ....?'' इति ।

तस्य प्रश्नं श्रुत्वा राक्षसः उच्चैः हसन् - ''मूर्ख ! लोके अनिष्टाः विवाहाः अधिकाः भवन्ति एव । अन्यच्च भवतः सुशीलायाः च विवाहः भविष्यति एव इति कारणतः मम, संन्यासिनः च विमुक्तिकालः सन्निहितः इत्येव अर्थः । यतः कृतस्य उपकारस्य प्रत्युपकाररूपेण भवान्, विवाहम् अनिच्छतोः कयोश्चित् वधूवरयोः विवाहं निर्वर्तयेत् एव खलु ? परस्परम् अनिच्छतोः वधूवरयोः विवाहस्य व्यवस्थापनं खेदाय स्यात् कदाचित् । तथापि आवयोः मोक्षार्थं भवता एतादृशस्य विवाहस्य व्यवस्थापनम् अङ्गीकरणीयम् एव'' इति उक्तवान् ।

''तथा एव भवतु । अहं प्रयत्नं

करिष्यामि'' इति उक्तवान् चक्रधरः ।

''अस्तु । भवान् तथा एवं करोतु । प्रथमं भवान् इतः गृहं गच्छतु । भवतः गृहे द्विलक्षरूप्यकाणि भवन्ति । भवान् सुशीलां परिणीय सुखेन जीवतु । परन्तु मम वचनं मा कदापि विस्मरतु'' इति उक्तवान् राक्षसः ।

अनन्तरं राक्षसस्य वचनानुसारम् एव कार्याणि प्रवृत्तानि ।

सुशीला-चक्रधरयोः विवाहस्य अनन्तरं षण्मासाभ्यन्तरे वसुदत्तनामकः कश्चित् चक्रधरस्य गृहम् आगत्य चक्रधरं पृष्टवान् - ''मम पुत्री निर्गतिकं कञ्चित् परिणेतुम् इच्छति । परन्तु अहम् एतं विवाहं सर्वथा न इच्छामि । पूर्वं भवान् अपि निर्धनः आसीत् खलु । इदानीं भवान् यथा धनवान् अस्ति तथा मम पुत्र्या इष्टः वरः अपि धनवान् भवतु इति मम इच्छा । तदर्थं कृपया मार्गं दर्शयतु'' इति ।


''धनसम्पादनमार्गः भवता न प्रष्टव्यः । भवतः पुत्र्या इष्टः वरः तं मार्गं मां पृच्छेत्'' इति चक्रधरः उक्तवान् ।

''सः वरः यत्किमपि अङ्गीकर्तुं सिद्धः नास्ति । 'धनसम्पादने मम तात्पर्यं सर्वथा नास्ति । इदानीं मम यादृशं जीवनम् अस्ति तदेव मम इष्टतमम् । तत्र परिवर्तनम् अहं न इच्छामि' इति वदति सः । अतः सः धनसम्पादनमार्गं प्रष्टुं भवत्समीपम् आगन्तुं न अर्हति'' इति उक्तवान् वसुदत्तः ।

''भवतः पुत्री किं वदति ?'' इति पृष्टवान् चक्रधरः ।

''सा अपि 'धनम् एव न इच्छामि' इति वदन्ती अस्ति । निर्धनम् एव अहं परिणेष्यामि इति तस्याः सङ्कल्पः'' इति वसुदत्तः उक्तवान् ।

चक्रधरः किञ्चित्कालं चिन्तयित्वा - ''तस्याः वयः न्यूनम् अस्ति । बुद्धिमत्ता अपि न्यूना । सर्वे जनाः काञ्चनमाश्रयन्ति इति वचनं न जानाति सा । भवतः पुत्र्याः



वचनं भवान् मा अङ्गीकरोतु । तस्मै निर्धनाय भवतः पुत्रीं मा ददातु । धनस्य कारणेन एव अहं सुशीलया सह सुखेन अस्मि । धनं विना जीवनं नितरां कष्टकरं स्यात् । अतः निर्धनाय पुत्र्याः दानं सर्वथा मास्तु । कञ्चित् धनिककुलीयं वरम् अन्विष्य तस्मै तां ददातु । एतेन किञ्चित्कालं तस्याः मनसि खेदः तिष्ठेत् । किन्तु कालः एव सर्वविधखेदान् अपि विस्मारयति । अतः एतं विवाहप्रस्तावं निराकृत्य भवान् धनिकवराय एव पुत्रीं ददातु'' इति उक्तवान् ।

एतत् श्रुत्वा वसुदत्तः सन्तोषेण ततः निर्गतवान् ।

वेतालः एतां कथां समाप्य अवदत् - ''हे राजन् ! चक्रधरः वसुदत्तं यत् उक्तवान् तत् किम् उचितम् ? अनिष्टः विवाहः क्रियते इति कारणतः वसुदत्तस्य पुत्री आत्महत्यां कुर्यात् । येन स्वहितं तु न सिद्ध्यति, अन्येषाम् अहितम् एव भवति, तादृशीं सूचनां किमर्थम् दत्तवान् चक्रधरः ? एतादृशसंशयानाम् उत्तरं जानन् अपि यदि भवान् न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति अवदत् ।

तदा त्रिविक्रमः उक्तवान् - ''येन राक्षसेन चक्रधरस्य उपकारः कृतः तस्य प्रत्युपकारकरणं चक्रधरस्य कर्तव्यम् । 'भवतः उपकारं करोमि' इति चक्रधरः राक्षसाय वचनं दत्तवान् आसीत् अपि । दत्तं वचनं पालनीयम् एव खलु ! तथा अकरणं पापस्य कारणं भवति । अतः चक्रधरः वसुदत्तं सूचितवान् यत् निर्धनाय पुत्र्याः दानं मास्तु इति । 'एवं तर्हि राक्षसत्वं प्राप्स्यतः वसुदत्तस्य का गतिः ?' इति तु चिन्तनीयं नास्ति । अप्रियं विवाहं निर्वर्तयन्तः मातापितरः लोके अवश्यं भवन्ति एव । अतः तादृशाः राक्षसत्वं प्राप्य वसुदत्तं तस्मात् स्थानात् मोक्षयिष्यन्ति एव । अतः चक्रधरः वसुदत्तस्य राक्षसत्वप्राप्तिं, तत्पुत्र्याः आत्महत्यासम्भावनां च जानन् अपि उक्तवान् यत् धनिककुलीयाय एव पुत्रीं ददातु इति । युक्तम् एव आचरितं तेन'' इति ।

एवं वदता त्रिविक्रमेण मौनभङ्गः कृतः आसीत् । अतः शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा यथापूर्वं वृक्षस्य शाखाम् अवलम्बितवान् ।







# कः दुष्टः ? कः सज्जनः ?

आरब्धं कार्यं परित्यक्तुम् अनिच्छन् त्रिविक्रमः पुनरपि वृक्षस्य समीपं गत्वा शाखायां लम्बमानं शवं स्कन्धे आरोप्य यथापूर्वं श्मशानाभिमुखं प्रस्थितवान् । तदा शवान्तर्गतः वेतालः अवदत् - ''अये राजन् ! एतस्मिन् मध्यरात्रे घोरे श्मशाने भवान् यत् एतत् कार्यं करोति तस्य प्रेरयिता कः ? पिता गुरुः वा न स्यात् खलु ? यद्यपि गुरुः पिता वा पूज्यौ एव, तथापि क्वचित् तौ अविचिन्त्य व्यवहरन्तौ अमार्गे प्रेरयितुम् अपि अर्हतः । अत्र कारणं युक्तायुक्ततानिर्णये तयोः असामार्थ्यम् । अत्र उदाहरणरूपेण विश्वदत्तनामकस्य कथां श्रावयामि । श्रद्धया शृणोतु तावत्'' इति ।

अनन्तरं वेतालेन कथा आरब्धा -

हरप्रियपुरे विश्वदत्तः नाम कश्चन वणिक् आसीत् । तस्य पुत्रस्य नाम धनदत्तः इति । धनदत्तः बुद्धिमान् एव । किन्तु विचिन्त्य निर्णये असमर्थः । अतः पित्रा श्रमेण

## वेतालकथा



सम्पादितं धनं सः विना विवेचनं व्ययीकरोति स्म । पुत्रस्य एतादृशप्रवृत्तेः कारणतः विश्वदत्तः महान्तं खेदम् अनुभवति स्म ।

कदाचित् विश्वदत्तः पुत्रम् आहूय - ''वत्स ! मया सम्पादितं धनं सुखेन व्ययीकुर्वता भवता अद्यावधि विवेकः एव न प्राप्तः । अतः इतः परं भवतः व्ययार्थम् अहं धनं न दास्यामि । जीवननिर्वहणार्थं यत् धनम् आवश्यकं तत् स्वश्रमेण एव सम्पादयतु भवान्'' इति ।

पितुः वचनम् अवमाननाय मन्यमानः धनदत्तः वाणिज्यं कर्तुम् इच्छन् मित्राणि साहाय्यं प्रार्थितवान् । तदा तैः उक्तं - ''मूलधनविनियोगे भवतः अपि यदि भागः स्यात् तर्हि वयं किञ्चिद्धनसाहाय्यं कुर्याम । रिक्तहस्तस्य तु भवतः साहाय्यं कर्तुं न शक्नुमः वयम्'' इति । अतः अन्ते अनन्यगतिकतया धनदत्तः पितरम् एव धनं याचितवान् ।

तदा विश्वदत्तः उक्तवान् - ''अपेक्षामात्रेण कोऽपि वणिक् भवितुं न अर्हति । यस्य सामर्थ्यं भवति स तु धनं विना अपि बुद्धिबलम् एव मूलधनत्वेन उपयुज्य वाणिज्यारम्भं कृत्वा साफल्यं प्राप्तुम् अर्हति'' इति ।

''किं बुद्धिबलादिप्रस्तावेन । यदि मयि विश्वासः अस्ति तर्हि भवान् मह्यं सहस्रं सुवर्णनाणकानि ऋणरूपेण ददातु । ऋणस्वीकरणम् अहं पत्रद्वारा दृढीकरिष्यामि । वर्षाभ्यन्तरे वृद्धिसहितम् ऋणं प्रत्यर्पयिष्यामि च'' इति उक्तवान् धनदत्तः ।

''बुद्धिमत्तायाः अभावे धनस्थितितः अपि न किमपि प्रयोजनम् । अतः भवतः बुद्धिपरीक्षा आदौ भवेत् । तदर्थम् एका परीक्षा आयोजयिष्यते मया'' इति उक्तवान् विश्वदत्तः ।

हरप्रियपुरात् अनतिदूरे रमणपुरनामके ग्रामे अभिरामः बलरामश्चेति उभौ वसतः स्म । जनाः भावयन्ति स्म यत् तौ मान्त्रिकशक्तिमन्तौ इति । यः नूतनकार्यस्य आरम्भं कर्तुम् इच्छति सः यदि एतयोः अन्यतरस्य सेवां करोति तर्हि तस्य कार्यं सिद्धं भविष्यति इति प्रतीतिः आसीत् ।

एतत्सर्वं पुत्रं निवेद्य विश्वदत्तः उक्तवान् - ''भवान् इतः रमणपुरं गच्छतु । षट् मासान् यावत् अभिरामस्य, पुनः षट्


मासान् यावत् बलरामस्य च सेवां कृत्वा तयोः आशीर्वादं प्राप्नोतु । जनाः वदन्ति यत् अभिरामः दुष्टः, जनानां निन्दकः च इति । बलरामः तु सज्जनः जनहितकांक्षी च इति जनानाम् आशयः अस्ति । अतः तयोः विषये भवतः अभिप्रायः कः इति अहं ज्ञातुम् इच्छामि'' इति ।

धनदत्तः पितुः वचनम् अङ्गीकुर्वन् रमणपुरं प्रति प्रस्थितवान् । विश्वदत्तः पुत्राय वराटिकामात्रम् अपि धनं न दत्तवान् आसीत् । किन्तु पुत्रः यदा पितुः नाम उक्त्वा धनं याचते तदा धनं कश्चित् यथा दद्यात् तथा व्यवस्थां तु कृतवान् आसीत् ।

धनदत्तः आदौ अभिरामस्य गृहं गतवान् । तस्य आगमनोद्देशं ज्ञात्वा अभिरामः - ''वत्स ! भवान् मम मित्रम् इव । यः कोऽपि सन्देहः आगतः चेदपि भवान् मां निस्सङ्कोचं पृच्छतु । किन्तु एकं तु स्मर्तव्यं यत् भवता कदापि मयि कोपः न उत्पादनीयः । कोपसमये अहं यत् वदामि तत् तथैव भविष्यति एव । अतः मम कोपनेन भवतः हानिः एव सम्भवेत्'' इति उक्तवान् ।

अभिरामस्य रामप्रियः नाम पुत्रः, दमयन्ती नाम पुत्री च आस्ताम् । तौ वयसा धनदत्तात् अपि कनिष्ठौ । तौ बहून् विषयान् धनदत्तात् जानीतः स्म । गच्छता कालेन धनदत्तः यत् वदति तदेव वेदवाक्यं जातम् ।


अभिरामः धनदत्तं बहूनि वाणिज्य-रहस्यानि बोधयति स्म । सर्वाणि वाणिज्यतन्त्राणि श्रद्धया शृतवान् धनदत्तः



कदाचित् अभिरामं पृष्टवान् - ''श्रीमन् ! भवत्तः मया बहवः विषयाः ज्ञाताः । भवता उक्तः मार्गः अनुसरणीयः चेत् प्रामाणिकता, सत्यनिष्ठा इत्यादयः परित्यक्तव्याः भवेयुः । अधर्मः च आचरणीयः भवेत् । एतत् युक्तं न खलु ?'' इति ।

तदा अभिरामः उक्तवान् - ''वाणिज्यं सदापि असत्यादिसम्मिश्रितम् एव भवति । वाणिज्यक्षेत्रे न्याय-धर्म-प्रामाणिकतादयः आधिक्येन न चिन्तनीयाः । किन्तु राज्ञः कोपः कथमपि यथा न स्यात् तथा जागरूकता आश्रयणीया । राज्ञः उच्चाधिकारिणां च तोषः यावत् भवति तावत् वाणिज्ये न कोऽपि क्लेशः'' इति ।

धनदत्तः एतत् बोधनं गृहीतवान् । सायं तदेव रामप्रियं दमयतीं च बोधितवान् । तौ अपि उत्साहेन एतत् बोधनं श्रुतवन्तौ ।



प्रतिदिनं धनदत्तः एतादृशम् एव बोधयति स्म इति कारणतः तौ निर्णीतवन्तौ यत् आवाभ्याम् अपि भाविजीवने वाणिज्यम् एव करणीयम् इति । अतः वाणिज्यव्यवहारज्ञाने तौ विशेषकुतूहलिनौ जातौ ।

एतां वार्तां कथमपि ज्ञातवान् अभिरामः । धनदत्तम् आहूय असन्तोष-मिश्रितेन स्वरेण उक्तवान् - "अहम् उत्तमानि वाणिज्यतन्त्राणि बोधयामि । भवान् तु मम पुत्रौ दुर्मार्गोपदेशेन नाशयन् अस्ति । किम् एतत् उचितम् ?" इति ।

तदा धनदत्तः शान्तस्वरेण पृष्टवान् - "आर्य ! भवान् मां यत् बोधितवान् तदेव अहं तौ बोधितवान् । एवं स्थिते मया किं वा अपराद्धम् ? तयोः नाशनार्थं कुत्र वा प्रयत्नः कृतः ?" इति ।

"वाणिज्यं नाम असत्यकथन-वञ्चनादीनाम् असूयायाः च क्षेत्रम् । तादृशे अनुचिते क्षेत्रे मम पुत्रयोः आसक्तिं जनयन् भवान् घोरम् अपराधम् एव कुर्वन् अस्ति" इति कोपेन उक्तवान् अभिरामः ।

"यत् वाणिज्यम् अस्माकं जीवनं नाशयति तत् मां किमर्थं बोधितवान् भवान् ? किं भवान् मम प्रगतिं न इच्छति ?" इति पृष्टवान् धनदत्तः ।

"तत्र कारणम् अपि अस्ति । वाणिज्यं यद्यपि अप्रशस्तमार्गावलम्बितं भवति तथापि लोके तत् अपरिहार्यम् । अतः जनान् अहं वाणिज्ये प्रेरयामि । किन्तु मम पुत्रौ वाणिज्ये आसक्तौ न भवेताम् इति मम इच्छा । अतः तौ उद्दिश्य वाणिज्यतन्त्रस्य बोधनम् अहं न इच्छामि" इति उक्तवान् अभिरामः ।

"तन्नाम यदि हानिः भवति तर्हि अन्येषाम् एव भवतु, न तु मत्परिवारस्य इति खलु भवतः चिन्तनम् ? एतादृशं चिन्तनं किम् उचितम् ? सर्वथा असामञ्जस्यपूर्णः व्यवहारः भवतः" इति धैर्येण उक्तवान् धनदत्तः ।

एतत् श्रुत्वा अभिरामः नितरां क्रुद्धः सन् - "अये, गुरोः मम व्यवहारस्य एव युक्तायुक्ततां विमृशतः भवतः कियत् धार्ष्ट्यम् ? धिक् भवन्तम् । मम कोपं वर्धितवतः भवतः प्रतिदिनम् अशुभं भविष्यति । निर्गच्छतु इतः" इति उक्तवान् ।

धनदत्तः तु उपेक्षया हसन् ततः निर्गतवान् । यावत् सः किञ्चिद्दूरं गतवान्


तावत् कदलीत्वचः उपरि पादस्य स्थापनात् पतितवान् । ततः उत्थातुम् अशक्नुवन् सः यावत् कष्टम् अनुभवन् आसीत् तावता कश्चन आगत्य तम् उत्थाप्य वैद्यसमीपं नीतवान् ।

वैद्यः तस्य योग्यां चिकित्सां कृत्वा व्रणस्य कारणं पृष्टवान् । तदा धनदत्तः प्रवृत्तं समग्रं निवेदितवान् ।

''अये ! अभिरामस्य शापः प्राप्तः वा भवता ? एवं तर्हि भवान् प्रतिदिनं किमपि अनिष्टं सम्मुखीकरिष्यति एव । किं विपदः स्वागतीकरणेन ? अद्यैव तं शरणं गत्वा क्षमां प्रार्थयतु'' इति बोधितवान् वैद्यः ।

''शापादिषु विश्वासः नास्ति मम । आधुनिके काले अपि यः शापादिषु विश्वसिति सः निश्चयेन मूर्खः एव । ममापि युक्तायुक्तताविवेकः अस्ति । यदि आवश्यकता भविष्यति तर्हि प्रतिदिनं भवत्समीपम् आगत्य चिकित्सां प्राप्नुयां, किन्तु कदापि तं वराकम् अभिरामं शरणं न गमिष्यामि'' इति उक्तवान् धनदत्तः ।

वैद्यः क्षणकालम् आलोच्य - ''वत्स! भवतः चिकित्सार्थम् अहं यावन्तं व्ययं करोमि तावत् हरिहरपुरीयः विश्वदत्तः दास्यति । अतः चिकित्साकरणे मम न कोऽपि क्लेशः । जानद्भिः अस्माभिः दिने दृष्टे कूपे रात्रौ न पतनीयम् । स्वास्थ्यं हि अमूल्यं लोके । तस्य नाशः सर्वथा अनुचितः । अभिरामः शरणं गतः चेत् सर्वं सुष्ठु भविष्यति । अथवा बलरामं वा शरणं गच्छतु । ततः अपि भवान् अपायात् मुक्तः



भवेत् कदाचित्'' इति सूचितवान् ।

''बलरामस्य गृहं प्रति एव अहं प्रस्थितवान् आसम् । बलरामः किं मम आगमनं सन्तोषेण स्वागतीकुर्यात् ?'' इति पृष्टवान् धनदत्तः ।

''वस्तुतः मार्गे पतितं भवन्तम् अत्र बलरामः एव आनीतवान् । परोपकारी सः । सर्वान् अपि प्रीत्या आदरेण च पश्यति सः'' इति उक्तवान् वैद्यः ।

ततः धनदत्तः बलरामस्य गृहं गत्वा स्वपरिचयम् उक्त्वा प्रवृत्तं समग्रं निवेदितवान् ।

सर्वं श्रुत्वा बलरामः उक्तवान् - ''वाणिज्यं प्रजाहितार्थं परोपकारार्थं च स्यात् । तदुभयं वाणिज्यात् कथं सम्पादनीयम् इति तु स्वानुभवात् एव ज्ञातव्यम् । अतः भवान् अद्यैव वाणिज्यस्य



आरम्भं करोतु । मूलधनं तु अहं दास्यामि । प्राप्ते लाभे उभयोः अपि समभागः भवतु । एतत् अनुमतं खलु भवतः ?'' इति ।

तदा धनदत्तः आश्चर्यम् अनुभवन् पृष्टवान् - ''श्रीमन् ! भवान् सज्जनः इति मया श्रुतम् । एवं स्थिते वञ्चनाबहुले वाणिज्ये मां किमर्थं प्रवर्तयितुं प्रयत्नं करोति भवान् ?'' इति ।

''वत्स ! वैद्यः चिकित्सार्थं यथा धनं प्राप्नोति, गायकः गानस्य निमित्तं यथा धनं प्राप्नोति तथा वणिक् कृतस्य वाणिज्यस्य निमित्तं धनं प्राप्नोति । अतः न्याय्येन मार्गेण वाणिज्ये प्रवर्तनं न पापाय । अतिलाभाशया दुर्मिश्रणे प्रवर्तनं, वञ्चनामार्गस्य आश्रयणम् इत्यादयः न करणीयाः । भवन्तं मार्गे योजयितुम् एव भागहरत्वेन अहम् अपि वाणिज्ये प्रवृत्तः अस्मि'' इति उक्तवान् बलरामः ।

धनदत्ताय एतानि वचनानि अरोचन्त । अतः सः झटिति वाणिज्यम् आरब्धवान् । बलरामस्य आशीर्वादात्, दैवबलात् वा तस्य वाणिज्यं मासचतुष्टयाभ्यन्तरे एव प्रवृद्धम् । बलरामः मूलधनरूपेण सहस्त्रं रूप्यकाणि दत्तवान् आसीत् । प्रथमे मासद्वये एव पञ्चसहस्त्रं रूप्यकाणि लाभरूपेण प्राप्तानि । तत्र अर्धभागं बलरामाय दत्तवान् धनदत्तः । अग्रे प्रतिमासं लाभः प्रवृद्धः एव । प्रतिमासं लाभस्य अर्धभागं बलरामाय यच्छति स्म धनदत्तः । यदा पञ्चमः मासः अतीतः तदा धनदत्तः चिन्तितवान् - 'बलरामः यावत् धनं मूलधनरूपेण दत्तवान् ततः बहुगुणितं धनं लाभरूपेण सः एतावता एव प्राप्तवान् अस्ति । यदि वृद्धिव्यवहारं सः कुर्यात् तर्हि वर्षानन्तरम् अपि एतस्य अर्धभागम् अपि वृद्धिरूपेण प्राप्तवान् न स्यात्' इति ।

अतः सः कदाचित् बलरामम् उक्तवान् - ''आर्य ! भवान् मह्यं मूलधनरूपेण यावत् दत्तवान् तस्य वृद्धिम् अनन्तगुणितं लाभं च प्राप्तवान् अस्ति । अतः इतः परं लाभे भागं मा पृच्छतु'' इति ।

तदा कुपितः बलरामः - ''वाणिज्ये आवाम् अंशभागिनौ । अहं मूलधनस्य विनियोगं कृतवान् । ततः भवान् वाणिज्यं कृतवान् । उभयोः अपि लाभे समभागः इति तु आवयोः सन्धिः आसीत् एव । इदानीं धनाशया सन्धेः भङ्गः न उचितः'' इति उक्तवान् ।

''आवयोः सन्धिः आसीत् इति तु सत्यम् एव । किन्तु स च सन्धिः वञ्चनापूर्णः आसीत् । तत् इदानीं मया ज्ञातम् अस्ति । अन्यच्च स च सन्धिः पत्रलेखनदानेन प्रमाणीकृतः तु न । तत्कारणतः तस्य सन्धेः पालनम् इतः परं मया न क्रियते । यदि भवान् एतत् न अङ्गीकरोति तर्हि मया भवतः सहवासः एव परित्यज्यते'' इति ।

''भवान् यथा इच्छति तथैव भवतु । किन्तु इतः परं यत् प्रवर्तिष्यते तस्य मम च कोऽपि सम्बन्धः न भविष्यति'' इति उक्तवान् बलरामः ।

एतदनन्तरं धनदत्तः विना वचनं ततः निर्गत्य मार्गम् आगतवान् । तत्र सः स्खलनात् पतितः सन् उत्थातुम् एव न शक्तवान् । दयालुः कश्चित् तं चिकित्सालयं नीतवान् ।

वैद्यः यथोचितचिकित्सां कृत्वा - ''अये, अभिराम-बलरामयोः वाक्सिद्धिः अस्ति । बाल्यात् एव ताभ्याम् एषा शक्तिः प्राप्ता अस्ति । प्रायः दैवानुग्रहः एव अत्र कारणम् । किन्तु तयोः वाक्सिद्धिः एतद्ग्रामपरिसरमात्रे कार्यकारिणी, न अन्यत्र । यदि इतः परम् अपि भवान् अत्र भविष्यति तर्हि प्रतिदिनं भवतः विपत्तिः निश्चिता । अतः भवान् अद्यैव एतं ग्रामं परित्यजतु'' इति सूचितवान् ।

धनदत्तः तस्मिन् एव दिने तं ग्रामं परित्यज्य गत्वा गृहं प्राप्य पितरं प्रवृत्तं समग्रं निवेद्य - ''अभिरामः बलरामः च दुष्टौ एव । उभौ अपि शापम् एव दत्तवन्तौ'' इति



उक्तवान् ।

तदा विश्वदत्तः - ''भवतः बुद्धिमत्ता कियती इति मया ज्ञातम् । भवान् वाणिज्यार्थम् अर्हः न । यतः वाणिज्ये महती बुद्धिमत्ता अपेक्षिता । कृष्यर्थं पशुपालनार्थं वा अर्हः भवान्'' इति उक्तवान् ।

वेतालः एवं कथां समाप्य अवदत् - ''अये राजन् ! पुत्रः वाणिज्यार्थम् अर्हः न इति विश्वदत्तः यत् निर्णीतवान् तत् किम् उचितम् ? धनदत्तः स्वानुभवबलात् ज्ञातवान् आसीत् यत् अभिरामः बलरामः च दुष्टौ इति । यदा धनदत्तात् स्वप्रयोजनं नास्ति इति तौ ज्ञातवन्तौ तदा कुपितौ तौ शापं दत्तवन्तौ । अतः तयोः दुष्टता तावत् सिद्धा । किन्तु विश्वदत्तस्य आशयः अस्ति यत् तयोः अन्यतरः सज्जनः अस्ति इति ।

अन्यच्च धनदत्तः वाणिज्यम् आरभ्य प्रभूतं लाभं सम्पादितवान् आसीत् । तादृशम् अपि पुत्रं विश्वदत्तः किमर्थम् उक्तवान् यत् भवान् वाणिज्यार्थम् अनर्हः इति ? केन आधारेण अभिराम-बलरामयोः अन्यतरः सज्जनः इति विश्वदत्तः निर्णीतवान् ? मम एतेषां प्रश्नानाम् उत्तराणि भवान् जानन् अपि यदि न वदेत् तर्हि भवतः शिरः सहस्रधा भग्नं भवेत्'' इति ।

तदा मौनं स्थातुम् अशक्तः त्रिविक्रमः उक्तवान् - ''अभिरामः दुष्टः इत्यत्र नास्ति सन्देहः । यतः यत् अनुचितम् इति सः जानाति तदेव सः अन्यं कर्तव्यत्वेन बोधयति स्म । किन्तु बलरामः न तथा । धनदत्तस्य सामर्थ्यम् अजानन् अपि सः तस्य सामर्थ्ये विश्वस्य मूलधनं विनियुक्तवान् । एतत् एव तस्य सज्जनतां द्योतयति । तस्य आशीर्वादस्य फलतः धनदत्तस्य वाणिज्यं दिने दिने प्रवृद्धम् । धनदत्ताय शापं दत्तवान् तु अभिरामः । बलरामस्य परिचयः यदा धनदत्तेन प्राप्तः तदा अभिरामस्य शापः शक्तिहीनः जातः आसीत् । अतः धनदत्तः ततः अग्रे विपदं न प्राप्तवान् आसीत् । किन्तु अविवेकी धनदत्तः एतत् सर्वं ज्ञातुम् अशक्नुवन् 'भवते लाभं न दास्यामि' इति बलरामम् उक्तवान्, भवतः सहवासं न इच्छामि इत्यपि सूचितवान् सः । एवं धनदत्तात् अपमानितः बलरामः स्वस्य अनुग्रहं प्रतिस्वीकृतवान् । तस्मात् अभिरामस्य शापस्य शक्तिः उज्जीविता अभवत् । किन्तु एतस्य कारणं किम् इति न अवगतवान् धनदत्तः । बलरामस्य कोपः एव कारणम् इति निर्णीतवान् सः । अतः गृहं प्रत्यागत्य सः 'उभौ अपि दुष्टौ' इति पितरं निवेदितवान् । एतत् श्रुत्वा विश्वदत्तः निर्णीतवान् यत् वाणिज्यार्थम् आवश्यकं नैपुण्यं विचक्षणता वा धनदत्तस्य सर्वथा नास्ति इति । धनदत्तः वाणिज्ये लाभं यत् प्राप्तवान् तत् बलरामस्य आशीर्वादात् एव इति मया किं पुनर्वक्तव्यम् ?'' इति ।

एवं वदता त्रिविक्रमेण मौनभङ्गः कृतः आसीत् । अतः शवान्तर्गतः वेतालः ततः अदृश्यः भूत्वा वृक्षस्य शाखाम् अवलम्बितवान् ।

